ओ३म्

# DAYANAND ANGLO-VEDIC COLLEGE

दयानन्द ऐङ्ग्लो वैदिक विद्यालय पाठ्यपुस्तकानि

READERS

SANSKRIT SERIES

संस्कृतपरिपाठ्यम्

RELIGIOUS PORTION.

धर्म्मभागः

## SELECTIONS FROM THE VEDA BHASHYA BHUMIKA

*(An Introduction to the Study of the Vedas.)*

वेदभाष्य भूमिका संग्रहः

COMPILED BY

संकलितः

DALPAT RAI VIDYARTHI, M. A.

*(A member of the D. A. V. College Managing Committee.)*

एम. ए. उपाधिधारिणा दलपत राय विद्यार्थिना,

अस्य ग्रन्थस्य सर्वाधिकारा दयानन्द महाविद्यालय पाठपुस्तकोप सभायाः

ALL RIGHTS RESERVED BY THE COLLEGE TEXT BOOK SUB-COMMITTEE

LAHORE.

1895.

पुस्तकालय संख्या ६६ मा. मा. २५ 199

# भूमिका ॥

मैं कदापि इस कार्य्य अर्थात् स्वामी जीके वेदभाष्य भूमिका संग्रह बनाने के योग्य नहीं था, और अच्छा होता यदि कोई बड़ा विद्वान योग्य पुरुष ठीक २ प्रकार से इस कार्य्यको करता परन्तुयह देख कर कि दो वर्ष से उक्त महाविद्यालय की कमेटी में इस पुस्तक की आवश्यकता जतलाई जाती थी; मैंने शीघ्रता से यह पुस्तक सङ्कलित करदी है, आशा है कि मुझ अल्प बुद्धि विद्यार्थी की भूल चूक को विद्वान् जन अवश्य क्षमा करेंगे ॥

पण्डित कालीचरण शर्म्मा ने इस पुस्तक के प्रूफ संशोधन करने में बड़ी सहायता दी है, उस के लिये उन का धन्यवाद है ॥

जो बड़े २ विषय भाष्य आदि करने वालों के लिये अवश्य हैं, वह उन विद्यार्थियों को, जिन के लिये यह पुस्तक रचीगयी है, पहुंच से बाहर समझ छोड़ दिये गये हैं, उन को विद्वान् जन स्वयमेव स्वामी जी की पुस्तक में देख लें। मुक्ति विषय वा सृष्टि उत्पत्ति आदि विषय भी इस में नहीं लिये गये, वह भी महाशय गण असली पुस्तक में देख लें यहां केवल वह विषय संक्षेप से लिखे हैं जिन से आर्य्य धर्म्म क्या है यह ज्ञात होता है ॥

इस पुस्तक का केवल यह उद्देश्य है कि विद्यार्थीयों को और और बालकों को जो अन्य नाना प्रकार की विद्याध्यन करते हैं अपने वेदोक्त धर्म्म का भी कुछ ज्ञान प्राप्त करावे जिस से वह न्यूनता दूर हो जावे जो आज कल अनुभव होती है कि हमारी पाठशालों के विद्यार्थी बड़ी परीक्षा और डिगरी आदि पास करलेते हैं परन्तु जब पाठशाला से निकलते हैं तो अपने धर्म्म का कुछ भी ज्ञान न होने के कारण प्रायः उस से बिमुख कर लिये जाते हैं या प्रायः बुरे विषयों में पड़कर आर्य्य सन्तान और जाति के रत्न बनने के स्थान में उस जाति के लिये एक भार और लज्जा के देने वाले हो जाते हैं ॥

इस पुस्तक में धर्म्म का निर्णय किया गया है और बताया गया है कि आर्य्यधर्म्म क्या है कई पुस्तकें अङ्गरेज़ी भाषा में उनको ऐसी भी पढ़नी होती है कि जिन में उन के अपने धर्म्म का खण्डन भी होता है और जो योरिपी फिलास्फी आदि पढ़ते हैं उसमें प्रायः यह भी आया करताहै कि उनका धर्म्म अर्थात् वैदिकमत उस फिलास्फीय सायंसके सामने चलनहीं सकता आशाहै कि यह पुस्तक उस न्यूनता

ो पूरा करेंगे और यदि विद्यार्थी विचारके साथ इसपुस्तक कोपढ़ेंगे
ो उन को मालूम होगा कि आर्य्यधर्म्म केवल सब सायंस और फि-
ास्फ़ोके सामने ठहर ही नहीं सकताहै, बलकि संसारके सब धर्मों से
वित्रहै और उस धर्म्मका प्रतिपादन करने वाला पुस्तक अर्थात वेद
ंपूरण विद्याओंका भण्डारहै और सबसत्य विद्याएं उसी से निकलीहैं,
ब हम किसी धर्म्म के महत्व की प्रशंसा करने लगें तो हमारा यह
हिला कर्तव्यहै कि अपने धर्म्म पुस्तकोंके पत्रोंकोभी खोलकर देखलें
ोछे विचार पूर्वक जो प्रशंसनीय और उत्तम मार्ग हो उसपर दृढ़हो
ावें अन्तमें इस विनयके साथ यह पुस्तक उनकी सेवामें भेट करता हूं
क मेरेप्यारे पाठक और विद्यार्थीभाई उन सिद्धान्तोंको जो इस ग्रन्थमें
र्णनकिये गयेहैं बहुत विचारसे पढेंगे और धर्म्मके असली तात्पर्य्यको
मझकर उसके अनुकूल अपनाआचरण करेंगे और ऋषियोंके सच्चे पुत्र
ानकर फिर एक वार इस देशके महत्व को दुन्या को दिखलायेंगे ॥

**भूमिका स्वामी जी**

"वेदार्थाभिप्रकाशप्रणयसुगमिका कामदा मान्यहेतुः
संक्षेपाद्भूमिकेयं विमलविधिनिधिः सत्यशास्त्रार्थयुक्ता ।
संपूर्णाकार्य्यथेदं भवति सुरुचि यन्मन्त्रभाष्यं मयातः
पश्चादीशानभक्त्या सुमतिसहितया तन्यते सुप्रमाणम् ॥

**ओ३म् सहनाववतु सहनौभुनक्तु सहवीर्य्यंकरवाव-**
**॥ तेजस्विनावधीतमस्तु । माविद्विषावहै । ओ३म्**
**ान्तिः शान्तिः शान्तिः ॥ १ ॥ तैत्तिरीयआरण्यके ।**
**वमप्रपाठके । प्रथमानुवाके ॥**

ब्रह्मानन्तमनादिविश्वकृदजं सत्यं परं शाश्वतं विद्या यस्य सना-
ानो निगमभृद्वैधर्म्यविध्वन्सिनी । वेदाख्या विमलाहिताहि जगते नृभ्यः
भाग्यप्रदा तन्नत्वा निगमार्थसाध्यमतिना भाष्यं तु तन्तन्यते"

आर्य्य सज्जनों का दास

ाहौर २८-३-९५ दलपत राय विद्यार्थी, एम ए,

# CANONS AND RULES FOR THE STUDY AND INTERPRETATION OF THE VEDAS.

Before I make an attempt to lay down these canons, I am bound to state that I have no presumption of originality on these points. I have only arranged in a systematic order what is to be found in the learned authorities on the subject in a scattered form. Moreover, these will be only a few of the many which they have established. I do not and can not for a moment say that these are the only methods. The study of the works of the *Vedavettas* will, I hope, widen my knowledge as I advance in my researches. And so I will advise every one who wants to have a thorough knowledge of these canons to study the larger works of Swami Dayanand, and Pandit Guru Datta, and finally of the well-known and immortal orginators of the Vedic Grammar and Vocabulary (*i.e.*, Panni, Patanjali, Yasak, &c.)

The following are the most important points for the consideration of those who have a mind to study and translate the Vedas :—

I. "Language, like all other things that live or are of organised growth is subject to constant variations depending partly on the laws of development of phonetic organs, partly on external circumstances of fusion and introduction of foreign languages, and partly on the laws of the evolution of human thought itself. Owing to this and many other causes, all living languages are daily undergoing changes, which accumulate and after a sufficiently long interval appear to have created very different, though cognate languages. Any thing, thought or philosophical system, that is invested with linguistic garb therefore requires for its correct interpretation that the laws which govern those linguistic variations, and *the variations of the sense* of words should be carefully studied. Otherwise, our interpretation would suffer from misconception, and anachronism. To take a concrete example, let us consider the case of the Roman Republic. In the times of the Roman Republic, when public press was unknown, newspapers unheard of, locomotive engines undreamt of, and other means that engender or facilitate the communication of indelible impressions of human thought or reason unthought of, and when Forum was the only place of resort for all audience, and oratory had a totally different meaning, the Senate signified a different institution from what it now does. Republic or democracy of the people—the people then existing—was what would be to us something like oligarchy, though still very different from it in many essential features. Now a reader studying the literature of the period corresponding to Roman Republic, would find his information of that period in-

in his studies, the words Democracy, Republic and the like, were to call forth before his mind what they now signify. Such a knowledge would be inconsistent with itself, a medley of two epochs, and would be such as on critical examination would be termed sheer nonsense. Now let us come directly to the Vedas. Shatpatha, and Nirukta, are confessedly books of much anterior date to the modern commentaries. Are the authors of the Nirukta, the Nighantu, the Mahabhashya, and other old commentators at one with the modern commentators, or are they at variance with the modern writers? That, if they differ* reliance must be placed upon old commentators.

II. Now Yasaka, the author of Nirukta, lays down that the Vedic terms are all Yaugik.† On the authority of Nirukta, Patanjali (the commentator of Panni, the father and founder of the Science of Grammar and Philology,) quotes in his Mahabhashya the same opinion, and distinguishes the Vedic terms from Rurhi terms by the designation of 'Naigama.' All the Rishis and Munis, ancient authors and commentators without exception, regard Vedic terms to be *Yaugikas* and Yoga-rurhis only; and the Laukika terms to be Rurhi also.

Even Professor Max Müller, in his mythological moods, is compelled to confess at least concerning certain portion of the Vedas that their words are *Yaugika*. Says he "But there is a charm in these primitive strains discoverable in no other class of poetry. Every word retains something of its radical meaning, every epithet tells; every thought, in spite of the most intricate and abrupt expressions, is, if we once disentangle it, true, correct, and complete."‡

Further on, says Max Müller, "Names are to be found in the Vedas as it were in a still fluid state. They never appear as *appellations* nor yet as *proper names*; they are organic, not yet broken or smoothed down." §

III. "It is well known that ancient languages are particularly rich in synonymns, or to speak more correctly, that in them the same object is called by many names, are, in fact,

---

* They do differ is a point which can be easily settled by seeing and studying the examples from these commentators given in Swamiji's Rigveda Bhashya Bhumika and Guru Dutta's Vedic Magazines Nos. 2 and 3. The simple fact that these commentators take their hold upon the Grammars (like Laghukaumudi) and Vocabularies (like Amarkosha &c.) of the modern language is sufficient to prove these translations to be vain and fallacious.

† The terms are *yaugika*, *yoga-rurhi* and *rurhi* only. For a full explanation of these see the Vedanga Prakash of Swamiji and 'Terminology of the Vedas by Guru Dutta.'

‡ History of Ancient Sanskrit Literature, pp. 553.

§ Ibid pp. 755.

polynymus. While in modern languages most objects have one name only, we find in ancient Sanskrit, in ancient Greek and Arabic, a large choice of words for the same object. Each name could express one side only of whatever had to be named, and not satisfied with one partial name, the early framers of language produced one name after the other, and after a time retained those which seemed most useful for special purposes. Thus the sky might be called not only the brilliant but the dark, *the covering, the thundering, the rain-giving.*"*

Even, in the face of these facts, European scholars are so very reluctant to leave their pre-conceived notions, that they will assert that there was a plain direction in the Vedas to the effect that the Almighty God was called by different names. He is called Agni, (expressing oneside or one attribute only of whatever had to be named), the illuminator of all and the source of light. He is called Vishnu (the omni-present and omniscient, and so on. How do these scholars ignore this fact while translating the Vedas is quite unintelligible to me. If this above quoted fact be borne in mind, I think, there will be no difficulty in arriving at the conclusion that the Vedic religion is monotheism pure and simple.

IV. "In the discussion of philosophical subjects, pre-conceived notions are the worst enemies to encounter. They not only prejudicially bias the mind, but also take away that truthfulness and honest integrity from the soul, which alone are compatible with the righteous pursuit and discernment of *Truth. In the treatment of a question such as the estimation of the value of a system of philosophy or religion, extreme sobriety* and *impartiality of the mind are required.*"

V. "*Nor is it to be supposed that a religious or philosophical* system can be at once mastered by a mere acquaintance with grammar and language. It is necessary that the mind should, by an adequate previous discipline, be raised to an exalted *mental condition, before the recondite and invisible truths* of man and nature can be comprehended. So is it with the Vedic philosophy. The Rishis, Munis, and all the Vedic commentators have, therefore, unanimously declared that before a man can lay claims to a rational interpretation of the Vedas he must be a complete master of the science of orthœpy (Shiksha), the science of language (Vyakarana), the science of etymology (Nirukta), the science of morals (Kalpa), the science of poetry (Chhanda) and the science of Geology and Astronomy (Jyotish).† He

* Max Müller's Lectures on the Science of Religion, pp. 276-277.

† The well-known six Vedangas.

must be well versed in the philosophy of Dharma (Purva Mimansa), the philosophy of characteristics (Vaisheshika), (Nyaya) the doctrines of the logic or the science of evidence, (Sankhya) the philosophy of essential existences, (Yoga) the philosophy of Yoga, (Vedanta) and the philosophy of the Vedanta.* He must have thoroughly studied the Upvedas, the Upanishads and the Brahmanas.

VI. The most simple fact that words in every language have many different, and distinct meanings, should not be ignored. In translating, always such meaning should only be attached to a word, as suit the sense and the sequenceof the sentence. It can be best illustrated by an example. The word *khalifa* in the *Persian* and Urdu lauguages means :—prophet, successor to a prophet, king, successor to a king, monitor, teacher, preceptor, barber, tailor, washerman, and so on. Now, if one and one only (let us take the meaning teacher) be thought to be the meaning of this word in every sentence that occurs in a Persian book dealing with the accounts of kings, prophets, preceptors, and others, would it convey any meaning? There is a verse 'In the beginning there was word, and word was with God and word was God.' Now ordinarily word means 'a term composed of more than one letter. If this ordinary meaning of the word 'word' be taken what will the verse mean? It will mean, "In the beginning there was a term composed of more than one letter, this term composed of more than one letter was with God, and this term was God." This sort of interpretations have been actually given for the Vedic hymns by the European Scholars.

VII. If what has just now been stated be well remembered, the so often quoted objection 'that (1) there is great repetition in the Vedas and (2) "there is only one original Veda, (the Rig) and all the other three Vedas are only composed from extracts out of that one Veda, will be easy to answer. It should be borne in mind that as one word conveys many different meanings according to the sense and sequence of the sentence in which it occurs, so likewise a sentence conveys different meanings according to the *account* or point under discussion in a book. The same word occurring in a book dealing with electricity and lightning may mean electricity and lighting while occurring in a book dealing with horse breeding it may mean a horse. It rather speaks in favour of the poet or th compiler of a book that he has so few sentences, and so fe words while he conveys or mentions, so many truths and present so many points.

* The well-known six upangas

DALPAT RAI Vidyarth

# PART I.

## Chapter I.

### १ अथ वेदसंज्ञाविचारः ।

अथ कोयं वेदो नाम मन्त्रभागसंहितेत्याह । किंच मन्त्रब्राह्मणयोर्वेदनामधेयमिति कात्यायनोक्तेर्ब्राह्मणभागस्यापि वेदसंज्ञा कुतो न स्वीक्रियतइति । मैवं वाच्यम् । न ब्राह्मणानां वेदसंज्ञा भवितुमर्हति । कुतः । पुराणेतिहाससंज्ञकत्वाद्वेदव्याख्यानादृषिभिरुक्तत्वादनीश्वरोक्तत्वात्कात्यायनभिन्नैर्ऋषिभिर्वेदसंज्ञायामस्वीकृतत्वान्मनुष्यबुद्धिरचितत्वाच्चेति ॥

### २ अथ वेदविषयविचारः

अत्र चत्वारो वेदविषयाः सन्ति । विज्ञानकर्मोपासना ज्ञानकाण्डभेदात् । तत्रादिमो विज्ञानविषयोहि सर्वेभ्यो मुख्योस्ति । तस्य परमेश्वरादारभ्य तृणपर्य्यन्तपदार्थेषु साक्षाद्बोधान्वयत्वात् । तत्रापीश्वरानुभवो मुख्योस्ति । कुतः । अत्रैव सर्वेषां वेदानां तात्पर्यमस्तीश्वरस्य खलु सर्वेभ्यः पदार्थेभ्यः प्रधानत्वात् । अत्र प्रमाणानि । सर्वे वेदा यत्पदमामनन्ति तपाꣳसि सर्वाणि च यद्वदन्ति । यदिच्छन्तो ब्रह्मचर्य्यं चरन्ति तत्तेपदं संग्रहेण ब्रवीम्योमित्येतत् ॥ कठोपनि० वल्ली २ मं० १५ तस्य वाचकः प्रणवः योगशास्त्रे । अ० १ पा० १ सू० २७ । ओ३म् खं ब्रह्म । यजुः० । अ० ४० । ओमितिब्रह्म । तैत्तरीयारण्यके । प्र० ७ अनु० ८ ॥ तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षाकल्पोव्याकरणं निरुक्तं छन्दोज्योतिषमिति । अथ परायया तदक्षरमधिगम्यते ॥ १ ॥ यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुः श्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः ॥ २ ॥ मुण्डके १ खण्डे १ मं० ५ । ६ ॥ एषामर्थः । ( सर्ववेदा:०) यत्परमं पदंमोक्षाख्यं

परब्रह्मप्राप्तिलक्षणं सर्वानन्दमयं सर्वदुःखेतरदस्ति तदेवौंकार वाच्यमस्ति (तस्य०) तस्येश्वरस्य प्रणव ओंकारो वाचकोस्ति वाच्यश्चेश्वरः (ओ३म्०) ओमितिपरमेश्वरस्य नामास्ति तदेव परं ब्रह्म सर्वे वेदा आमनन्ति । आसमन्तादभ्यस्यन्ति मुख्यतया प्रतिपादयन्ति (तपांसि) सत्यधर्मानुष्ठानानितपांस्यपि तदभ्यासपराण्येव सन्ति ( यदिच्छन्तो० ) ब्रह्मचर्य्यग्रहणमुपलक्षणार्थं ब्रह्मचर्य्यगृहस्थवानप्रस्थसन्यासाश्रमाचरणानि सर्वाणि । तदेवामनन्ति । ब्रह्मप्राप्त्यभ्यासपराणि सन्ति । यद्ब्रह्मेच्छन्तो विद्वांसस्तस्मिन्श्रद्धया समाना वदन्त्युपदिशन्ति च । हे नचिकेतः अहं यमो यदीदृशं पदमस्ति तदेतत्ते तुभ्यं संग्रहेण संक्षेपेण ब्रवीमि ॥ १ ॥ ( तत्रापरा० ) वेदेषु द्वे विद्ये वर्त्तेते अपरापरा चेति । तत्र यया पृथिवी तृणमारभ्य प्रकृतिपर्य्यन्तानां पदार्थानां ज्ञानेन यथावदुपकारग्रहणं क्रियते सा अपरोच्यते । यया चादृश्यादिविशेषणयुक्तं सर्वशक्तिमद्ब्रह्म विज्ञायते सा परा ऽर्थादपरायाः सकाशादत्युत्कृष्टास्तीति वेद्यम् ॥

**अन्यच्च । तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ॥ दिवीव चक्षुराततम् ॥ १ ॥ ऋग्वेदे । अष्टके १ अध्याये २ वर्गे ७ मंत्रः ५ ॥**

अस्यायमर्थः । यत् ( विष्णोः ) व्यापकस्य परमेश्वरस्य ( परमं ) प्रकृष्टानन्दस्वरूपं ( पदं ) पदनीयं सर्वोत्तमोपायैर्मनुष्यैः प्रापणीयं मोक्षाख्यमस्ति तत् ( सूरयः ) विद्वांसः सदा सर्वेषु कालेषु पश्यन्ति कीदृशं तत् (आततम्) आसमन्तात्ततं विस्तृतं यद्देशकालवस्तुपरिच्छेदरहितमस्ति । अतः सर्वैः सर्वत्र तदुपलभ्यते तस्य ब्रह्मस्वरूपस्य विभुत्वात् । कस्यां किमिव ( दिवीवचक्षुराततम् ) दिविमार्तण्डप्रकाशे नेत्रदृष्टेर्व्याप्तिर्यथा भवति । तथैव तत्पदं ब्रह्मापि वर्तते मोक्षस्य च सर्वस्मादधिकोत्कृष्टत्वात् । तदेव द्रष्टुं प्राप्तुमिच्छन्ति । अतो वेदाविशेषेण तस्यैव प्रतिपादनं कुर्वंति एतद्विषयकं वेदान्तसूत्रं व्यासोप्याह । तत्तु

समन्वयात् । अ० १ पा० १ सू० ४ अस्यायमर्थः । तदेव ब्रह्म सर्वत्र वेदवाक्येषु समन्वितं प्रतिपादितमस्ति । क्वचित्साक्षात्क्वचित्परंपरया च । अतः परमोर्थो वेदानां ब्रह्मैवास्ति । तथा यजुर्वेदे प्रमाणम् ।

यस्मान्न जातः परो अन्यो अस्ति य आविवेश भुवनानि विश्वा ॥ प्रजापतिः प्रजया सꣳरराणास्त्रीणि ज्योतीꣳषि सचते स षोडशी ॥ य० अ० ८ मं० ३६

एतस्यार्थः (यस्मात्) नैव परब्रह्मणः सकाशात् (परः) उत्तमः पदार्थः (जातः) प्रादुर्भूतः प्रकटः (अन्यः) भिन्नः कश्चिदप्यस्ति (प्रजापतिः) प्रजापतिरिति ब्रह्मणो नामास्ति प्रजापालकत्वात् (य आविवेश भु०) यः परमेश्वरः (विश्वा) विश्वानि सर्वाणि (भुवनानि) सर्वलोकान् (आविवेश) व्याप्तवानस्ति (सꣳरराणः) सर्वप्राणिभ्यो ऽत्यंतं सुखं दत्तवान्सन् (त्रीणि ज्योतीꣳषि) त्रीण्यग्निसूर्यविद्युदाख्यानि सर्वजगत्प्रकाशकानि (प्रजया) ज्योतिषो ऽन्यया सृष्ट्या सह तानि (सचते) समवेतानि करोति कृतवानस्ति (सः) अतः स एवेश्वरः (षोडशी) येन षोडशकला जगति रचितास्ता विद्यन्ते यस्मिन्नस्य वा तस्मात्स षोडशीत्युच्यते । अतो ऽयमेव परमोर्थो वेदितव्यः ॥ ओमित्येतदक्षरमिदꣳ सर्वं तस्योपव्याख्यानम् ॥ इदं माण्डूक्योपनिषद्वचनमस्ति । अस्यायमर्थः । ओमित्येतदस्य नामास्ति तदक्षरम् । यन्न क्षीयते कदाचिद्यच्चराचरं जगदश्नुते व्याप्नोति तद्ब्रह्मैवास्तीति विज्ञेयम् । अस्यैव सर्वैर्वेदादिभिः शास्त्रैः सकलेन जगता वोपगतं व्याख्यानं मुख्यतया क्रियते ऽतोयं प्रधानविषयोस्तीत्यवधार्यम् । किं च नैव प्रधानस्याग्रे ऽप्रधानस्य ग्रहणं भवितुमर्हति । प्रधानाप्रधानयोः प्रधाने कार्य्यसंप्रत्ययइति व्याकरणमहाभाष्यवचनप्रामाण्यात् । एवमेव सर्वेषां वेदानामोश्वरे मुख्येर्थे मुख्यतात्पर्य्यमस्ति । तत्प्राप्तिप्रयोजनाएव

सर्वउपदेशाः सन्ति। अतस्तदुपदेशपुरःसरेणैव त्रयाणां कर्मोपासनाज्ञान-काण्डानां पारमार्थिकव्यावहारिकफलसिद्धये यथा योग्योपकाराय चानुष्ठानं सर्वैर्मनुष्यैर्यथावत्कर्त्तव्यमिति॥

## ३ अथ वेदोत्पत्तिविषयः

तस्माद्यज्ञात्सर्वहुत ऋचः सामानिजज्ञिरे। छन्दाꣳसिजज्ञिरे तस्माद्यजुस्तस्मादजायत॥ यजुः० अ० मं ७

यस्मादृचोअपातक्षन् यजुर्यस्मादपाकषन्। सामानियस्यलोमान्यथर्वांगिरसोमुखम्। स्कंभंतंब्रूहिकतमः-स्विदेवसः॥ २॥ अथर्व० कां० १० प्रपा० २३ अनु० ४ मं २०

॥ भाष्यम्॥

(तस्माद्यज्ञात्०) तस्माद्यज्ञात्सच्चिदानन्दादिलक्षणात्पूर्णात्पुरुषात् सर्वहुतात्सर्वपूज्यात्सर्वोपास्यात्सर्वशक्तिमतः परब्रह्मणः (ऋचः) ऋग्वेदः (यजुः) यजुर्वेदः (सामानि) सामवेदः (छन्दाꣳसि) अथर्ववेदश्च (जज्ञिरे) चत्वारो वेदास्तेनैव प्रकाशिता इति वेद्यम्। सर्वहुत इति वेदानामपि विशेषणं भवितुमर्हति वेदाः सर्वहुतः। यतः सर्वमनुष्यैर्होतुमादातुं ग्रहीतुं योग्याः सन्त्यतः। जज्ञिरे अजायतेति क्रियाद्वयं वेदानामनेकविद्यावत्त्वद्योतनार्थम्। तथा तस्मादिति पदद्वयमीश्वरादेव वेदा जाता इत्यवधारणार्थम्॥ वेदानां गायत्र्यादिच्छन्दोन्वितत्वात्पुनश्छन्दांसीतिपदं चतुर्थस्याथर्ववेदस्योत्पत्तिं ज्ञापयतीत्यवधेयम् यज्ञो वै विष्णुः श० कां०१ अ० १॥ इदं विष्णुर्विचक्रमेत्रेधानिदधेपदम् यजुर्वेदे। इति सर्वजगत्कर्तृत्वं विष्णौ परमेश्वर एव घटते नान्यत्र। विवेष्टि व्याप्नोति चराचरं जगत् स विष्णुः परमेश्वरः॥ १॥ (यस्मादृचो०) (यस्मात्सर्वशक्तिमतः ऋचः ऋग्वेदः (अपातक्षन्) अपातक्षत् उत्पन्नोस्ति

यस्मात् परब्रह्मणः (यजुः) यजुर्वेदः अपाकषन् प्रादुर्भूतोस्ति । तथैव यस्मात्सामानि सामवेदः (आंगिरसः) अथर्ववेदश्चोत्पन्नोस्ति । एवमेव यस्येश्वरस्यांगिरसोऽथर्ववेदोमुखं मुखवन् मुख्योस्ति । सामानिलोमानीव सन्ति । यजुर्यस्य हृदयमृचः प्राणश्चेति रूपकालंकारः । यस्माच्चत्वारोवेदा उत्पन्नाः स कतमः स्विद्देवोस्तितं त्वं ब्रूहीति प्रश्नः । अस्योत्तरम् (स्कंभं तं०) तं स्कंभं सर्वजगद्धारकं परमेश्वरं त्वं जानीहीति तस्मात्स्कंभात्सर्वाधारात्परमेश्वरात् पृथक् कश्चिदप्यन्योदेवो वेदकर्त्ता नैवास्तीति मन्तव्यम् ॥ २ ॥

एवं वा अरेस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वांगिरस इत्यादि । श० कां० १४ अ० ५ ॥ अस्यायमभिप्रायः । याज्ञवल्क्योभिवदति हे मैत्रेयि महत आकाशादपि वृहतः परमेश्वरस्यैव सकाशादृग्वेदादिवेदचतुष्टयं (निःश्वसितं) निःश्वासवत्सहजतया निःसृतमस्तीति वेद्यम् । यथा शरीराच्छ्वासो निःसृत्य पुनस्तदेव प्रविशति तथेश्वराद्वेदानां प्रादुर्भावतिरोभावौ भवत इति निश्चयः ॥

अत्र केचिदाहुः । निरवयवात्परमेश्वराच्छब्दमयोवेदः कथमुत्पद्येतेति । अत्र ब्रूमः । न सर्वशक्तिमतीश्वरे शंकेयमुपपद्यते । कुतः । मुखप्राणादिसाधनमन्तरापि तस्य कार्यं कर्तुं सामर्थ्यस्य सदैव विद्यमानत्वात् । अन्यच्च यथा मनसि विचारणावसरे प्रश्नोत्तरादिशब्दोच्चारणं भवति तथेश्वरेपि मन्यताम् । योस्ति खलु सर्वशक्तिमान् स नैव कस्यापि सहायं कार्यं कर्तुं गृह्णाति । यथास्मदादीनां सहायेन विना कार्यं कर्तुं सामर्थ्यं नास्ति । नचैवमीश्वरे । यदा निरवयवेनेश्वरेण सकलं जगद्रचितं तदा वेदरचनेकाशंकास्ति । कुतः । वेदस्य सूक्ष्मरचनवज्जगत्यपि महदाश्चर्यभूतं रचनमीश्वरेण कृतमस्त्यतः ॥

ननु जगद्रचने तु खल्वीश्वरमन्तरेण न कस्यापि सामर्थ्यमस्ति वेदरचने त्वन्यस्यान्यग्रन्थरचनवत्सामर्थ्यं स्यादिति । अत्रोच्यते । ईश्वरेण रचितस्य वेदस्याध्ययनानन्तरमेव ग्रन्थरचनेकस्यापि सामर्थ्यं स्या चान्यथा । नैव कश्चिदपि पठनश्रवनमन्तरा विद्वान् भवति । यथेद

नीम्। किंचदपि शास्त्रं पठित्वोपदेशं श्रुत्वा व्यवहारं च दृष्ट्वैव मनुष्याणां ज्ञानं भवति तद्यथा। कस्यचित्संतानमेकान्ते रक्षयित्वा ऽन्नपानादिकं युक्त्यादद्यात्तेन सह भाषणादिव्यवहारं लेशमात्रमपि न कुर्याद्यावत्तस्य मरणं न स्यात्। यथा तस्य किंचिदपि यथार्थं ज्ञानं न भवति। यथा च महारण्यस्थानां मनुष्याणामुपदेशमन्तरा पशुवत्प्रवृत्तिर्भवति। तथैवादिसृष्टिमारभ्याद्यपर्यंतं वेदोपदेशमन्तरा सर्वमनुष्याणां प्रवृत्तिर्भवेत्। पुनर्ग्रन्थरचनस्य तु का कथा॥

मैवं वाच्यम्। ईश्वरेण मनुष्येभ्यः स्वाभाविकं ज्ञानं दत्तं तच्च सर्वग्रन्थेभ्य उत्कृष्टमस्ति नैव तेन विना वेदानां शब्दार्थसंबन्धानामपि ज्ञानं भवितुमर्हति तदुन्नत्या ग्रन्थरचनपपि करिष्यन्त्येव पुनः किमर्थमन्यते वेदोत्पादनमीश्वरेण कृतमिति। एवं प्राप्ते वदामहे। नैव पूर्वोक्ताय शिक्षितायैकांते रक्षिताय बालकाय महारण्यस्थेभ्यो मनुष्येभ्यश्चेश्वरेण स्वाभाविकं ज्ञानं दत्तं किम्। कथं नास्मदादयोऽप्यन्येभ्यः शिक्षाग्रहणमंतरेण वेदाध्ययनेन च विना पण्डिता भवन्ति। तस्मात् किमागतं न शिक्षया विनाध्ययने न च स्वाभाविकज्ञानमात्रेण कस्यापि निर्वाहो भवितुमर्हति। यथास्मदादिभिरप्यन्येषां विदुषां विद्वत्कृतानां ग्रन्थानां च सकाशादनेकविधं ज्ञानं गृहीत्वैव ग्रंथान्तरं रच्यते। तथेश्वरज्ञानस्य सर्वेषां मनुष्याणामपेक्षावश्यं भवति। किंचन सृष्टेरारंभसमये पठनपाठनक्रमो ग्रंथश्च कश्चिदप्यासीत्तदानीमीश्वरोपदेशमंतरा न च कस्यापि विद्यासंभवो बभूव पुनः कथं कश्चिज्जनो ग्रन्थं रचयेत्। मनुष्याणां नैमित्तिकज्ञाने स्वातंत्र्याभावात्। स्वाभाविकज्ञानमात्रेणैव विद्याप्राप्त्यनुपपत्तेश्च। यच्चोक्तं स्वकीयं ज्ञानमुत्कृष्टमित्यादि तदप्यसमंजसम्। तस्य साधनकोटौ प्रविष्टत्वात्। चक्षुर्वत्। यथा चक्षुर्मनःसाहित्येनविना ह्यकिंचित्करमस्ति। तथान्येषां विदुषामीश्वरज्ञानस्य च साहित्येनविना स्वाभाविकज्ञानमप्यकिंचित्करमेव भवतीति॥

वेदोत्पादनईश्वरस्य किं प्रयोजनमस्तीत्यत्र वक्तव्यम्। उच्यते वेदानामनुत्पादने खलु तस्य किं प्रयोजनमस्तीति अस्योत्तरं तु वयं न

जानो ऽः। सत्यमेवमेतत्। तावद्वेदोत्पादने यदस्ति प्रयोजनं तच्छृणुत। ईश्वरे ऽनन्ता विद्यास्ति नवा। अस्ति। सा किमर्थास्ति। स्वार्था। ईश्वरः परोपकारं न करोति किम्। करोति तेन किम्। तेनेदमस्ति विद्या स्वार्था परार्था च भवति तस्यास्तद्विषयत्वात्। यद्यस्मदर्थमीश्वरो विद्योपदेशं न कुर्यात्तदान्यतरपक्षे सा निष्फला स्यात्। तस्मादीश्वरेण स्वविद्याभूतवेदस्योपदेशेन स प्रयोजनता संपादिता। परमकारुणिकोहि परमेश्वरोस्ति पितृवत्। यथा पिता स्वसन्ततिं प्रतिसदैव करुणां दधाति। तथेश्वरोपि परमकृपया सर्वमनुष्यार्थं वेदोपदेशमुपचक्रे। अन्यथांधपरंपरया मनुष्याणां धर्मार्थकाममोक्षसिद्ध्याविना परमानन्द एव न स्यात्। यथा कृपायमाणेनेश्वरेण प्रजासुखार्थं कंदमूलफललवणादिकं रचितं स कथं न सर्वसुखप्रकाशिकां सर्वविद्यामयीं वेदविद्यामुपदिशेत्। किंच ब्रह्माण्डस्योत्कृष्टसर्वपदार्थप्राप्त्या यावत्सुखं भवति न तावत् विद्याप्राप्तसुखस्य सहस्रतमेनांशेनापि तुल्यं भवत्यतो वेदोपदेश ईश्वरेण कृतएवास्तीति निश्चयः॥

ईश्वरेण लेखनीमसीपात्रादिसाधनानि वेदपुस्तकलेखनाय कुतो लब्धानि। अत्रोच्यते। अहहह महतीयं शंका भवता कृता विना हस्तपादाद्यवयवैः काष्ठलोष्ठादिसामग्रीसाधनैश्च यथेश्वरेण जगद्रचितं तथा वेदा अपि रचिताः सर्वशक्तिमतीश्वरे वेदरचनं प्रत्येवं माशंक। किन्तु पुस्तकस्थावेदा तेनादौ नोत्पादिताः। किं तर्हि ज्ञानमध्ये प्रेरिताः केषाम्। अग्निवाय्वादित्यांगिरसाम्। ते तु ज्ञानरहिता जडाः सन्ति। मैवं वाच्यं सृष्ट्यादौ मनुष्यदेहधारिणस्ते ह्यासन्। कुतः। जडे ज्ञानकार्यासंभवात्। यत्रार्थो संभवोस्ति तत्र लक्षणा भवति। तद्यथा। कश्चिदाप्तः कंचित्प्रति वदति मंचाः क्रोशन्तीति। अत्र मंचस्था मनुष्याः क्रोशन्तीति विज्ञायते। तथैवात्रापि विज्ञायताम्। विद्याप्रकाशसंभवो मनुष्येष्वेव भवतुमर्हतीति। अत्र प्रमाणम्। तेभ्यस्तप्तेभ्यस्त्रयोवेदा अजायंताग्नेर्ऋग्वेदो वायोर्यजुर्वेदः सूर्यात्सामवेदः। श० कां० ११ अ० ५। एषां ज्ञानमध्ये प्रेरयित्वा तद्द्वारा वेदाः प्रकाशिताः। सत्यमेवमेतत्।

परमेश्वरेण तेभ्यो ज्ञानं दत्तं ज्ञानेन तैर्वेदानां रचनं कृतमिति विज्ञाय मैवंविज्ञायि ते। ज्ञानं किं प्रकारकं दत्तम्। वेदप्रकारकं। तदीश्वरस्य वा तेषाम्। ईश्वरस्यैव। पुनस्तेनैव प्रणीता वेदा आहोस्वित्तैश्च। यस्य ज्ञानं तेनैव प्रणीताः। पुनः किमर्था शंका कृता तैरेव रचिता इति। निश्चयकरणार्था॥

ईश्वरो न्यायकार्यस्ति वा पक्षपाती। न्यायकारी। तर्हि चतुर्णामेव हृदयेषु वेदाः प्रकाशिताः कुतो न सर्वेषामिति। अत्राह। अत ईश्वरे पक्षपातस्य लेशोपि नैवागच्छति किन्त्वनेन तस्य न्यायकारिणः परमात्मनः सम्यग्न्यायः प्रकाशितो भवति कुतः न्यायित्वस्यैव नामास्ति यो यादृशं कर्म कुर्यात्तस्मै तादृशमेवफलं दद्यात्। अत्रैवं वेदितव्यं तेषामेव पूर्वपुण्यमासीद्यतः खल्व तेषां हृदये वेदानां प्रकाशः कर्तुं योग्योस्ति। किं च ते तु सृष्टेः प्रागुत्पन्नास्तेषां पूर्वपुण्यं कुत आगतम्। अत्र ब्रूमः। सर्वेजीवाः स्वरूपतो ऽनादयस्तेषां कर्म्माणि सर्वं कार्य्यं जगच्च प्रवाहेणैवानादीनि सन्तीति। एतेषामनादित्वस्य प्रमाणपूर्वकं प्रतिपादनमग्रे करिष्यते॥

## ४ अथ वेदानांनित्यत्वविचारः

ईश्वरस्य सकाशाद्वेदानामुत्पत्तौ सत्यां स्वतो नित्यत्वमेव भवति तस्य सर्वसामर्थ्यस्य नित्यत्वात्॥

यथा शास्त्रप्रमाणेन वेदानित्याः सन्तीति निश्चयोस्ति। तथा युक्त्यापि। तद्यथा। नासत आत्मलाभो न सत आत्महानम्। योस्ति स भविष्यति। इतिन्यायेन वेदानां नित्यत्वं स्वीकार्य्यम्। कुतः। यस्य मूलं नास्ति नैव तस्य शाखादयः संभवितुमर्हन्ति। बन्ध्यापुत्रविवाहदर्शनवत् पुत्रो भवेच्चेत्तदा वन्ध्यात्वं न सिध्येत् स नास्ति चेत्पुनस्तस्य विवाहदर्शने कथं भवतः। एवमेवात्रापि विचारणीयम्। यदीश्वरे विद्यानन्ता न भवेत्कथमुपदिशेत्। स नोपदिशेच्चेन्नैव कस्यापि मनुष्यस्य विद्यासंबन्धो दर्शनं च स्याताम्। निर्मूलस्य प्ररोहाभावात्। नह्यस्मिन्

जगति निर्मूलमुत्पन्नं किं चिद्दृश्यते। यस्य सर्वेषां मनुष्याणां साक्षादनुभवो ऽस्ति सो ऽत्र प्रकाश्यते। यस्य प्रत्यक्षोनुभवस्तस्यैव संस्कारो यस्य संस्कारस्तस्यैव स्मरणं ज्ञानं तेनैव प्रवृत्तिनिवृत्ती भवतो नान्यथेति। तद्यथा। येन संस्कृतभाषा पठ्यते तस्या ऽस्या एव संस्कारो भवति नाऽन्यस्याः। येन देशभाषाधीयते तस्या एव संस्कारो भवति नातो ऽन्यथा। एवं सृष्ट्यादावीश्वरोपदेशाऽध्यापनाभ्यां विना नैव कस्यापि विद्याया अनुभवः स्यात्। पुनः कथं संस्कारस्तेन विना कुतः स्मरणं न च स्मरणेन विना विद्याया लेशोपि कस्य चिद्भवितुमर्हति॥

किं च भोः। मनुष्याणां स्वाभाविकी या प्रवृत्तिर्भवति तत्र सुखदुःखानुभवश्च तयोत्तरोत्तरकाले क्रमानुक्रमाद्विद्यावृद्धिर्भविष्यत्येव पुनः किमर्थमीश्वराद्वेदोत्पत्तेः स्वीकारइति। एवं प्राप्ते ब्रूमः। एतद्वेदोत्पत्तिः करणे परिहृतं तत्रैष निर्णयः। यथानेदानीमन्येभ्यः पठनेन विना कश्चिदपि विद्वान् भवति तस्य ज्ञानोन्नतिश्च। तथा नैवेश्वरोपदेशागमेन विना कस्यापि विद्याज्ञानोन्नतिर्भवेत्। अशिक्षितबालकवनस्थवत्। यथोपदेशमन्तरा न बालकानां वनस्थानां च विद्या मनुष्यभाषाविज्ञाने अपि भवतः पुनर्विद्योत्पत्तेस्तु का कथा तस्मादीश्वरादेव या वेदविद्या ऽऽगता सा नित्यैवास्ति तस्य सत्यगुणवत्त्वात्। यन्नित्यं वस्तु वर्त्तते तस्य नामगुणकर्माण्यपि नित्यानि भवन्ति तदाधारस्य नित्यत्वात्। नैवाधिष्ठानमन्तरा नामगुणकर्मादयोगुणाः स्थितिं लभन्ते तेषां पराश्रितत्वात्। यन्नित्यं नास्ति न तस्यैतान्यपि नित्यानि भवन्ति। नित्यं चोत्पत्तिविनाशाभ्यामितरद्भवितुमर्हति। उत्पत्तिर्हि पृथग्भूतानां द्रव्याणां या संयोगविशेषाद्भवति। तेषामुत्पन्नानां कार्य्यद्रव्याणां सति वियोगे विनाशश्च संघाताभावात्। अदर्शनं च विनाशः। ईश्वरस्यैकरसत्वान्नैव तस्य संयोगवियोगाभ्यां संस्पर्शोपि भवति। अत्र कणादमुनिकृतं सूत्रं प्रमाणमस्ति। सदकारणवन्नित्यम्॥ १॥ वैशेषिके। अ० ४ सू० १। अस्यायमर्थः। यत्कार्य्यं कारणादुत्पद्य विद्यमानं भवति

दनित्यमुच्यते तस्य प्रागुत्पत्तेरभावात्। यत्तु कस्यापि कार्यं नैव
वति किं तु सदैव कारणरूपमेव तिष्ठति। तन्नित्यं कथ्यते। यद्यत्सं-
ोगजन्यं तत्तत्कर्त्रपेक्षं भवति कर्त्तापि संयोगजन्यश्चेत्तर्हि तस्याप्य-
ोऽन्यः कर्त्तास्तीत्यागच्छेत्। एवं पुनः पुनः प्रसंगादनवस्थापत्तिः।
च संयोगेन प्रादुर्भूतं नैव तस्य प्रकृतिपरमाण्वादीनां संयोगकरणे
ामर्थ्यं भवितुमर्हति तस्मात्तेषां सूक्ष्मत्वात्। यद्यस्मात्सूक्ष्मं तत्तस्यात्मा
वति स्थूले सूक्ष्मस्य प्रवेशार्हत्वात्। अयोग्निवत्। यथा सूक्ष्मत्वादग्निः
ठिनं स्थूलमयः प्रविश्य तस्यावयवानां पृथग्भावं करोति। तथा जल-
पि पृथिव्याः सूक्ष्मत्वात्तत्कणान् प्रविश्य संयुक्तमेकं पिण्डं करोति
छिनत्ति च। तथा परमेश्वरः संयोगवियोगाभ्यां पृथग्भूतो विभुरस्यतो
नियमेन रचनं विनाशं च कर्तुमर्हति। न चान्यथा। यथा संयोगवियो-
गान्तर्गतत्वान्नास्मदादीनां प्रकृतिपरमाण्वादीनां संयोगवियोगकरणे
सामर्थ्यमस्ति। तथेश्वरेपि भवेत्। अन्यच्च। यतः संयोगवियोगारंभो
भवति। स तस्मात्पृथग्भूतोस्ति तस्य संयोगवियोगारब्धस्यादिकारण-
त्वात्। आदिकारणस्याभावात्संयोगवियोगारंभस्यानुत्पत्तेश्च। एवंभूतस्य
सदा निर्विकारस्वरूपस्याजस्यानादेर्नित्यस्यसत्यसामर्थ्यस्येश्वरस्य सका-
शादेदानां प्रादुर्भावात्तस्य ज्ञाने सदैव वर्त्तमानत्वात्सत्यार्थवत्त्वं नित्यत्वं
चैतेषामस्तीति सिद्धम्॥

## Chapter II.

### अथ ब्रह्मविद्याविषयः॥

हिरण्यगर्भः समवर्त्तताग्रे भूतस्यजातः पतिरेक आसीत्॥ सदाधारपृथिवींद्यामुते मां कस्मै देवाय हविषा विधेम॥ १ ऋ० अ० ८ अ० ७ व० ३ मं॥ १

॥ भाष्यम् ॥

(हिरण्यगर्भः०) अग्रे सृष्टेः प्राग्घिरण्यगर्भः परमेश्वरो जातस्या-स्योत्पन्नस्य जगत एको ऽद्वितीयः पतिरेव समवर्त्तत। स पृथिवीमा-रभ्यद्युपर्य्यन्तं सकलं जगद्रचयित्वा (दाधार) धारितवानस्ति तस्मै सुखस्वरूपाय देवाय हविषा वयं विधेमेति ॥ १ ॥

**न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः। हि-रण्यगर्भ इत्येषमामाहिꣳसीदित्येषा यस्मान्नजात इत्येषः**

**१ यजु० अ० ३२ मं० ३ ॥ २ ॥**

यस्य पूर्णस्य पुरुषस्याजस्य निराकारस्य परमेश्वरस्य (महद्यशः) यस्याज्ञापालनाख्यं महाकीर्त्तिकरं धर्म्यं सत्यभाषणादिकर्त्तुमर्हं कर्माचरणं नामस्मरणमस्ति (हिरण्यगर्भ०) यो हिरण्यानां सूर्य्यादीनां तेजस्विनां गर्भउत्पत्तिस्थानम्। यस्य सर्वैर्मनुष्यैर्मामाहिꣳसीदित्येषा प्रार्थना कार्य्या। (यस्मान्न०) यो यतः कारणान्नैवैषः कस्य चित्सकाशा-त्कदाचिदुत्पन्नो नैव कदाचिच्छरीर धारणं करोति। नैव तस्य प्रतिमा ऽर्थात् प्रतिनिधिः प्रतिकृतिः प्रतिमानं तोलनसाधनं परिमाणं मूर्त्या-दिकल्पनं किंचिदप्यस्ति परमेश्वरस्यानुपमेयत्वादमूर्त्तत्वादपरिमेय त्वान्निराकारत्वात्सर्वत्राभिव्याप्तत्वाच्च। इत्यनेन प्रमाणेन मूर्त्तिपूजन-निषेधः ॥

**सपर्य्यगाच्छुक्रमकायमव्रणमस्नाविरꣳशुद्धमपाप-विद्धम्। कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥ ३ ॥ य० अ० ४० मं० ८**

यः कविः सर्वज्ञः। मनीषी सर्वसाक्षी परिभूः सर्वोपरिविराजमानः। स्वयंभूरनादिस्वरूपः परमेश्वरः शाश्वतीभ्यो नित्याभ्यः समाभ्यः प्रजाभ्यो वेदद्वाराऽन्तर्यामितया च याथा तथ्यतोऽर्थान् व्यदधात् विहितवानस्ति सपर्य्यगात्सर्वव्यापकोऽस्ति। यत् ( शुक्रं ) वीर्य्यवत्तमं (अकायं ) मूर्त्तिजन्मधारणरहितम् ( अव्रणं ) छेदभेदरहितं ( अस्नाविरं ) नाडीबंधनादिविरहं ( शुद्धं )·निर्दोषं ( अपापविद्धं ) पापात्पृथग्भूतं यदीदृशलक्षणं ब्रह्म सर्वैरुपासनीयमिति मन्यध्वम्। इत्यनेनापि शरीरजन्ममरणरहितईश्वरः प्रतिपाद्यते तस्मादयं नैवकेनापि मूर्त्तिपूजने योजयितुं शक्यइति। प्रश्नः॥ वेदेषु प्रतिमाशब्दोस्ति नवा। उत्तरम्। अस्ति। प्र० पुनः किमर्थो निषेधः। उ० नैव प्रतिमार्थेन मूर्त्तयो गृह्यन्ते। किं तर्हि परिमाणार्था गृह्यन्ते। अत्र प्रमाणानि॥

पुरुषएवेदꣳ सर्वं यद्भूतं यच्च भाव्यम्॥ उतामृतत्वस्येशानो यदन्नेनातिरोहति॥ ४॥

## ॥ भाष्यम् ॥

( पुरुषएवे० ) एतद्विशेषणयुक्तः पुरुषः परमेश्वरः (यद्भूतं) यज्जगदुत्पन्नमभूत् यद्भाव्यमुत्पत्स्यमानं चकाराद्वर्त्तमानं च तत्त्रिकालस्थं सर्वं विश्वं पुरुषएव कृतवानस्ति नान्यः। नैवातो हि परः कश्चिज्जगद्रचयितास्तीति निश्चेतव्यम्। उतापि स एवेशान ईषणशीलः सर्वस्येश्वरो ऽमृतत्वस्य मोक्षभावस्य स्वामी दातास्ति। नैवैतद्दानेकस्याप्यन्यस्य सामर्थ्यमस्तीति। पुरुषो यद्यस्मादन्नेन पृथिव्यादिना जगता सहातिरोहति व्यतिरिक्तःसन् जन्मादिरहितोस्ति। तस्मात्स्वयमजः सन्सर्वं जनयति स्वसामर्थ्यादिकारणात्कार्य्यं जगदुत्पादयति। नास्यादिकारणं किंचिदस्ति किंच सर्वस्यादिनिमित्तकारणं पुरुषएवास्तीति वेद्यम्॥ ४॥

तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम् । पशूंस्तांश्चक्रे वायव्यानारण्या ग्राम्याश्चये ॥ ५ ॥

॥ भाष्यम् ॥

(तस्माद्य०) अस्यार्थो वेदोत्पत्तिप्रकरणे कश्चिदुक्तः । तस्मात्परमेश्वरात् (संभृतः पृषदाज्यम्) पृषु सेचनेधातुः पर्षन्ति सिञ्चन्ति तुष्टिहत्यादिकारकमन्नादिवस्तु यस्मिंस्तत्पृषत् । आज्यं घृतं मधुदुग्धादिकं च पृषदिति भक्ष्यान्नोपलक्षणम् । आज्यमिति व्यंजनोपलक्षणम् यावद्वस्तु जगति वर्त्तते तावत्सर्वं पुरुषात्परमेश्वरसमर्थ्यादेव जातमिति बोध्यम् तत्सर्वमीश्वरेण स्वल्पं २ जीवैश्च सम्यग्धारितमस्ति । अतः सर्वैरनन्यचित्तेनायं परमेश्वरएवोपास्योनान्यश्चेति । ( पशूंस्तांश्चक्रे० ) यआरण्यावनस्थाः पशवो ये च ग्राम्या ग्रामस्थास्तान्सर्वान्स एव चक्रे कृतवानस्ति । सच परमेश्वरो वायव्यान् वायुसहचरितान्पक्षिणश्चक्रे चकारादन्यान्सूक्ष्मदेहधारिणः कीटपतंगादीनपि कृतवानस्ति ॥ ५ ॥

तस्मादश्वा अजायन्त ये केचोभयादतः गावोह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ ६ ॥

॥ भाष्यम् ॥

(तस्मादश्वा०) तस्मात्परमेश्वरसामर्थ्यादेवाश्वास्तुरंगा अजायन्त । ग्राम्यारण्यपशूनां मध्ये ऽश्वादीनामन्तर्भावादेषामुत्तमगुणवत्त्वप्रकाशनार्थोयमारम्भः ( ये केचोभयादतः (उभयतो दन्ता येषांत उभयादतो ये केचिदुभयादत उष्ट्रगर्दभादयस्तेऽप्यजायन्त । (गावोहज०) तथा तस्मात्पुरुषसामर्थ्यादेव गावोधेनवः किरणाश्चेन्द्रियाणि च जज्ञिरे जातानि । (तस्माज्जाता अजा०) एवमेव चाजाश्छागा अजावयश्च जाता उत्पन्ना इति विज्ञेयम् ॥ ६ ॥

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्। मुखं कि-
मस्यासीत् किं बाहू किमूरूपादा उच्येते ॥ ७ ॥

॥ भाष्यम् ॥

(यत्पुरुषं व्य०) यद्यस्मादेतं पूर्वोक्तलक्षणं पुरुषं परमेश्वरं कतिधा कियत्प्रकारैः (व्यकल्पयन्) तस्य सामर्थ्यगुणकल्पनं कुर्वंतीत्यर्थः । (व्यदधुः) तं सर्वशक्तिमन्तमीश्वरं विविधसामर्थ्यकथनेनादधुरर्थादनेक विधं तस्य व्याख्यानं कृतवन्तः कुर्वंति करिष्यन्ति च । (मुखं कि०) अस्य पुरुषस्य मुखं मुख्यगुणेभ्यः किमुत्पन्नमासीत् (किं बाहू) बलवीर्यादि गुणेभ्यः किमुत्पन्नमासीत् (किमूरू) व्यापारादिमध्यमैर्गुणैः किमुत्पन्न मासीत् (पादा उच्येते) पादावर्थान्मूर्खत्वादिनीचगुणैः किमुत्पन्नं वर्त्तते अस्योत्तरमाह ॥ ७ ॥

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः पर-
स्तात्। तमेव विदित्वाति मृत्युमेति नान्यः पन्था वि-
द्यतेऽयनाय ॥

॥ भाष्यम् ॥

( वेदाहमेतं पु० ) किं विदित्वा त्वं ज्ञानी भवसीति पृच्छ्यते तदुत्तरमाह । यतः पूर्वोक्तलक्षणविशिष्टं सर्वेभ्यो महान्तं वृहत्तममादि त्यवर्णं स्वप्रकाशविज्ञानस्वरूपं तमसोऽज्ञानाऽविद्यान्धकारात्परस्तात्पृथग् वर्त्तमानं परमेश्वरं पुरुषमहं वेद जानाम्यतोऽहंज्ञान्यस्मीति निश्चयः । नैव तमविदित्वा कश्चिज्ज्ञानी भवतुमर्हतीति । कुतः (तमेव विदित्वा०) मनुष्यस्तमेव पुरुषं परमात्मानं विदित्वाऽति मृत्युं मृत्युमतिक्रान्तं

मृत्योः पृथग्भूतं मोक्षाख्यमानन्दमेति प्राप्नोति । नैवातोऽन्यथेति । एवकारात्तमीश्वरं विहाय नैव कस्यचिदन्यस्य लेशमात्राप्युपासना- केनचित्कदाचित्कार्य्येतिगम्यते । कथमिदं विज्ञायते ऽन्यस्योपासना नैव कार्य्येति (नान्यः पन्था विद्यते ऽयनाय ) इति वचनात् । अयनाय व्यावहारिक पारमार्थिक सुखायाऽन्यो द्वितीयः पन्था मार्गो न विद्यते । किंतु तस्यैवोपासनमेव सुखस्यमार्गो ऽतोभिन्नस्येश्वरगणनोपासनाभ्यां मनुष्यस्य दुःखमेव भवतीति निश्चयः अतः कारणादेष एव पुरुषः सर्वै- रुपासनीयइति सिद्धान्तः ॥

प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा वि- जायते । तस्य योनिं परिपश्यन्ति धीरास्तस्मिन् हतस्थु- र्भुवनानि विश्वा ॥ ६ ॥

॥ भाष्यम् ॥

( प्रजापति० ) सएव प्रजापतिः सर्वस्य स्वामी जीवस्यान्यस्य च जड़स्य जगतोऽन्तरगर्भे मध्ये ऽन्तर्यामिरूपेणजायमानोऽनुत्पन्नोऽजः स न्नित्यं चरति । तत्सामर्थ्यादेवेदं सकलं जगद् बहुधा बहुप्रकारं विजा- यते विशिष्टतयोत्पद्यते ( तस्ययोनि० ) तस्य परब्रह्मणो योनिं सत्य- धर्मानुष्ठानं वेदविज्ञानमेव प्राप्तिकारणं धीरा ध्यानवन्तः ( परिप० ) परितः सर्वतः प्रेक्षन्ते ( तस्मिन्हतस्थुर्भु० ) यस्मिन्भुवनानि विश्वानि सर्वाणि सर्वे लोकास्तस्थुः स्थितिं चक्रिरे । हेति निश्चयार्थे तस्मिन्नेव परमे पुरुषे धीरा ज्ञानिनोमनुष्या मोक्षानन्दं प्राप्य तस्थुः स्थिरा भवन्तीत्यर्थः ॥

यत्परममवमं यच्च मध्यमं प्रजापतिः ससृजे विश्व रूपम् ॥ कियतास्कम्भः प्रविवेश तत्र यन्न प्राविशत् कि-

यत्तद्बभूव ॥ १० ॥ अथर्व० कां० १० अनु० ४ । मं० ८ ॥

देवाः पितरो मनुष्या गंधर्वाप्सरसश्चये । उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवादिवि श्रितः ॥ ११ ॥ अथर्व० कां० ११ प्रपा० २४ अनु० २ मं० २७ ॥

## ॥ भाष्यम् ॥

(यत्परम०) यत्परमं सर्वोत्कृष्टं प्रकृत्यादिकं जगत् । यच्च (अवमं निकृष्टं तृणमृत्तिका क्षुद्रकृमिकीटादिकं चास्ति (यच्च म०) यन्मनुष्यदेहाद्याकाशपर्य्यन्तं मध्यमं च तत्त्रिविधं सर्वं जगत् प्रजापतिरेव (ससृजे वि०) स्वसामर्थ्यरूपकारणात् । उत्पादितवानस्ति ॥ योऽस्य जगतो विविधंरूपं सृष्टवानस्ति (कियता०) एतस्मिंस्त्रिविधे जगति स्कम्भः प्रजापतिः स परमेश्वरः कियतासम्बन्धेन प्रविवेश न चैतत् परमेश्वरे (यन्न०) यत्त्रिविधं जगन्नप्राविशत् तत् कियद्बभूव । तदिदं जगत् परमेश्वरापेक्षयाल्पमेवास्तीति ॥

अथ प्रधानपुरुषव्यतिरिक्तः कोयमोश्वरो नामेति ॥ क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषईश्वरः ॥ १३ ॥ अ० १ सू१ २४ भा० अविद्यादयः क्लेशाः कुशला कुशलानि कर्माणि तत्फलं विपाकस्तदनुगुणावासना आशयाः ते च मनसि वर्त्तमानाः पुरुषे व्यपदिश्यन्ते स हि तत्फलस्यभोक्तेति यथा जयः पराजयो वा योद्धृषु वर्तमानः स्वामिभि व्यपदिश्यते योह्यनेन भोगेनापरामृष्टः सपुरुषविशेष ईश्वरः कैवल्यं प्राप्तास्तर्हि सन्ति च बहवः केवलिनः ते हि त्रीणि बंधनानि छित्वा कैवल्यं प्राप्ताः ईश्वरस्य च तत्संबन्धो न भूतो न भावो यथा मुक्तस्य पूर्वाबन्धकोटिः प्रज्ञायते नैवमीश्वरस्य यथा वा प्रकृतिलीनस्योत्तरा बन्धकोटिः संभाव्यते नैवमीश्वरस्य सतु सदैव मुक्तः सदैवेश्वर इति

योऽसौ प्रकृष्ट सत्वोपादानादीश्वरस्य शाश्वतिक उत्कर्षः सकिं स निमित्त आहो स्विन्निर्निमित्त इति तस्य शास्त्रं निमित्तं शास्त्रं पुनः किं निमित्तं प्रकृष्टसत्त्वनिमित्तमेतयोः शास्त्रोत्कर्षयोरीश्वरसत्त्वे वर्त्त-मानयोरनादिः संबन्धः एतस्मादेतद्भवति सदैवेश्वरः सदैव मुक्त इति तच्च तस्यैश्वर्य्यं साम्यातिशयविनिर्मुक्तं न तावदैश्वर्य्यान्तरेण तदति-शय्यते यदेवातिशायिस्यात्तदेव तत्स्यात्तस्माद्यत्रकाष्ठा प्राप्तिरैश्वर्य्यस्य स ईश्वरः न च तत्समानमैश्वर्यमस्ति कस्मात् द्वयोस्तुल्ययोरेकस्मिन् युगपत् कामितेर्थे नवमिदमस्तु पुराणमिदमस्त्विति एकस्य सिद्धावितरस्य प्रा-काम्यविघातादूनत्वं प्रसक्तं द्वयोश्च तुल्ययोर्युगपत् कामितार्थप्राप्तिर्नास्ति अर्थस्य विरुद्धत्वात्तस्माद्यस्य साम्यातिशयविनिर्मुक्तमैश्वर्यं स ईश्वरः स च पुरुषविशेष इति किं च ॥ १३ ॥ तत्र निरतिशयं सर्वज्ञबीजम् ॥ १४ ॥ अ० १ पा० १ सूत्र २५ । भा० यदिदमतीतानागत प्रत्युत्पन्न प्रत्येकसमुच्चयातीन्द्रियग्रहणमल्पं बहूनि सर्वज्ञबीजमेतद्धिवर्धमानं यत्र निरतिशयं स सर्वज्ञः अस्ति काष्ठा प्राप्तिः सर्वज्ञबीजस्य सातिशयत्वा-त्परिमाणवदिति यत्र काष्ठा प्राप्तिर्ज्ञानस्य स सर्वज्ञः स च पुरुषविशेषइति सामान्यमात्रोपसंहारे कृतोपक्षयमनुमानं न विशेषप्रतिपत्तौ समर्थमिति तस्य संज्ञादिविशेषप्रतिपत्तिरागमतः पर्य्यन्वेष्या तस्यात्मानुग्रहाभावेपि भूतानुग्रहः प्रयोजनं ज्ञानधर्मोपदेशेनकल्पप्रलयमहाप्रलयेषु संसारिणः पुरुषानुद्धरिष्यामीति । तथा चोक्तं । आदिविद्वान्निर्माणचित्तमधिष्ठाय कारुण्याद्भगवान् परमर्षिरासुरयेजिज्ञासमानाय तंत्रं प्रोवाचेति ॥ १४ ॥ स एव पूर्वेषामपि गुरुः कालेनानवच्छेदात् ॥ १५ ॥ अ० १ पा० १ सू० २६ ॥ भा० पूर्वेहि गुरवः कालेनावच्छिद्यन्ते यत्रावच्छेदार्थेनकालोनो-पावर्त्तते स एव पूर्वेषामपि गुरुः यथा ऽस्यसर्गस्यादौ प्रकर्षगत्या सिद्धः तथातिक्रान्तसर्गोतेष्वपि प्रत्येतव्यः ॥ १५ ॥ तस्य वाचकः प्रणवः ॥ १६ ॥ अ० १ अ० १ पा० १ सू० २७ ॥ भा० वाच्य ईश्वरः प्रणवस्य कि-मस्य संकेत कृतम् वाच्यवाचकत्वं अथ प्रदीपप्रकाशवदवस्थितमिति-स्थितोस्य वाच्यस्य वाचकेन सह संबंधः संकेतस्त्वीश्वरस्य स्थितमेवार्थ-

मभिनयति यथावस्थितः पितापुत्रयोः संबंधः संकेतेनावद्योत्यते अयमस्य पिता अयमस्य पुत्र इति सर्गान्तरेष्वपि वाच्यवाचक शक्त्यपेक्षस्तथैव सङ्केतः क्रियते संप्रतिपत्ति नित्यतया नित्यः शब्दार्थ संबन्ध इत्यागमिनः प्रतिजानते विज्ञात वाच्यवाचकत्वस्य योगिनः ॥ १ ॥ तज्जपस्तदर्थ भावनम् ॥ १७ ॥ अ० १ पा० १ सू० २८ ॥ भ० प्रणवस्य जपः प्रणवाभिधेयस्य चेश्वरस्य भावना तदस्य योगिनः प्रणवंजपतः प्रणवार्थं च भावयतश्चित्त मेकाग्रंसंपद्यते । तथा चोक्तम् । स्वाध्यायाद्योगमासीतयोगात्स्वाध्यायमामनेत् स्वाध्याययोगसंपत्या परमात्मा प्रकाशत इति

तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम् । पूषानो यथा वेद सामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ १ ॥ ऋ० अ० १ अ० ६ व० १५ मं० ५ ॥ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीवचक्षुराततम् ॥ २ ॥ ऋ० अ० १ अ० २ व० ७ मं० ५ ॥

अनयोरर्थः । ( तमीशानम् ) ईष्टेऽसावीशानः सर्वं जगत्कर्त्ता- (जगतस्तस्थुषस्पतिं) जगतो जङ्गमस्य तस्थुषः स्थावरस्य च पतिः स्वामी (धियं जिन्वम्) यो बुद्धेस्तृप्तिकर्त्ता (अवसे हूमहे वयम्) तमवसे रक्षणाय वयं हूमहे आह्वयामः (पूषः) पुष्टिकर्त्ता (नः) स एवास्माक पुष्टिकारकोस्ति (यथा वेदसामसद्वृधे) हे परमेश्वर यथा येन प्रकारेण (वेदसां विद्यासुवर्णादीनां धनानां वृधे वर्धनाय भवानस्ति तथैव कृपय रक्षिताऽसत्) रक्षकोप्यस्तु । एवं (पायुरदब्धः स्वस्तये) अस्माकं रक्षणे तत्स्वस्तये सर्वसुखाय (अदब्धः) अनलसःसन् पालनकर्त्ता सदैवास्तु ॥ १ विष्णोरिति मंत्रस्यार्थो वेदविषयप्रकरणे विज्ञानकाण्डे गदितस्तत्र॥ द्रष्टव्यः

परीत्य भूतानि परीत्य लोकान् परीत्य सर्वाः प्रदिशोदिशश्च॥ उपस्थाय प्रथमजामृतस्यात्मनात्मानमभिसंविवेश ॥ ३ ॥ य० अ० ३२ मं० ११ ॥

(परीत्यभू०) यः परमेश्वरो भूतान्याकाशादीनि परीत्य सर्वतोभिव्याप्य सूर्य्यादीन्लोकान् परीत्य पूर्वादिदिशः परीत्य अग्नेयादि प्रदिशश्च परीत्य परतः सर्वत इत्वा प्राप्य विदित्वा च। (उपस्थाय प्र०) यः स्वसामर्थ्यस्याप्यात्मास्ति। यश्च प्रथमानि सूक्ष्मभूतानि जनयति तं परमानन्दस्वरूपं मोक्षाख्यं परमेश्वरं यो जीव आत्मना स्वसामर्थ्येनान्तःकरणेनोपस्थाय तमेवोपगतो भूत्वा विदित्वा चाभिसंविवेश आभिमुख्येन सम्यक प्राप्य स एव मोक्षाख्यं सुखमनुभवतीति॥

महद्यक्षं भुवनस्य मध्ये तपसि क्रान्तं सलिलस्य पृष्ठे ॥ तस्मिञ्छ्रयन्ते यउके च देवा वृक्षस्य स्कन्धः परित इवशाखाः ॥ ४ ॥ अथर्व० कां० १० प्रपा० २३ अनु० ४ मं० ३८ ॥

(महद्यक्षं) यन्महत्सर्वेभ्यो महत्तरं यक्षं सर्वमनुष्यैः पूज्यं (भुवनस्य) सर्वसंसारस्य (मध्ये) परिपूर्णं (तपसिक्रान्तं) विज्ञाने वृद्धं (सलिलस्य) अन्तरिक्षस्य कारणरूपेण कार्य्यस्य प्रलयानन्तरं (पृष्ठे) पश्चात् स्थितमस्ति तदेव ब्रह्मविज्ञेयम् (तस्मिञ्छ्र०) तस्मिन्ब्रह्मणि ये केचापि देवास्त्रयस्त्रिंशद्वस्वादयस्ते सर्वे तदाधारेणैव तिष्ठन्ति। कस्य का इव (वृक्षस्य स्कन्धः०) वृक्षस्य स्कंधे परितः सर्वतोलग्नः शाखा इव॥

न द्वितीयो न तृतीयश्चतुर्थो नाप्युच्यते ॥ ३ ॥ न पञ्चमो न षष्ठः सप्तमो नाप्युच्यते ॥ ७ ॥ नाष्टमो न नवमो दशमो नाप्युच्यते ॥ ८ ॥ तमिदं निगतं सहः स एष एक एकवृदेक एव ॥ ९ ॥ सर्वे अस्मिन्देवा एकवृतो भवन्ति ॥ १० ॥ अथर्व० कां० १३ अनु० ४ मं० १६ । १७ । १८ २० । २१ ॥

(न द्वितीय०) एतैर्मन्त्रैरिदं विज्ञायते परमेश्वर एक एवास्तीति । नैवातो भिन्नः कश्चिदपि द्वितीयः तृतीयः चतुर्थः । ६ । पञ्चमः षष्ठः सप्तमः । ७ । अष्टमो नवमो दशमश्चेश्वरो विद्यते । ८ । यतो नवभिर्नकारैर्द्वित्वसंख्यामारभ्य शून्यपर्यन्ते नैकमीश्वरं विधायास्माद्भिन्नेश्वरभावस्यातिशयतया निषेधो वेदेषु कृतोऽस्यतो द्वितीयस्योपासनमत्यन्तं निषिध्यते । सर्वानन्तर्यामितया प्राप्तः सन् जडं चेतनं च द्विविधं सर्वं जगत् स एव पश्यति नास्य कश्चिद्द्रष्टास्ति । न चायं कस्यापि दृश्यो भवितुमर्हति । येनेदं जगद्व्याप्तं तमेव परमेश्वरमिदं सकलं जगदपि (निगतं) निश्चितं प्राप्तमस्ति । व्यापकाद्व्याप्यस्य संयोगसंबन्धत्वात् । (सहः) अतः सर्वं सहते तस्मात्स । एवैष सहोस्ति । स खल्वेक एव वर्त्तते । न कश्चिद्द्वितीयस्तदधिकस्तत्तुल्योवास्ति । एकशब्दस्य त्रिर्ग्रहणात् । अतः सजातीय विजातीय स्वगतभेदराहित्यमीश्वरे वर्त्तत एव द्वितीयेश्वरस्यात्यन्तनिषेधात् कस्मादेक वृदेक एवेत्युक्तत्वात् । स एष एक एकवृत् । एकेन चेतनमात्रेण वस्तु नैव वर्त्तते । पुनरेक एवासहायः सन् यदिदं सकलं जगद्रचयित्वा धारयतीत्यादिविशेषणयुक्तोस्ति । तस्य सर्वशक्तिमत्वात् ॥ ९ ॥ अस्मिन्सर्वशक्तिमति परमात्मनि सर्वेदेवाः पूर्वोक्ता वस्वादय एकवृत एकाधिकरणा एव भवन्त्यर्थात्प्रलयानन्तरमपि तस्मा-

मर्थं प्रार्थ्यैक कारणहृत्सयो भवन्ति। एवंविधास्त्वान्येपि ब्रह्मविद्याप्रतिपादकाः सपर्य्यगाच्छुक्रमकायमित्यादयो मन्त्रा वेदेषु बहवः सन्ति। ग्रन्थाधिक्यभया नात्र लिख्यन्ते। किंतु यत्र यत्र वेदेषु ते मन्त्राः सन्ति तत्तद्भाष्यकरणावसरे तत्र तत्रार्थानुदाहरिष्याम इति॥

## इति ब्रह्म विद्या विषय विचारः॥

### Chapter III.

## अथोपासना विषयः॥

अत्र चत्वारो वेदविषयाः सन्ति विज्ञानकर्मोपासना ज्ञानकाण्ड भेदात्॥ तत्र द्वितीयोविषयः कर्मकाण्डाख्यः स सर्वः क्रियामयोस्ति। नैव तेन विना विद्याभ्यासज्ञाने अपि पूर्णे भवतः। कुतः बाह्यमानसव्यवहारयोर्बाह्याभ्यन्तरे युक्तत्वात्। स चानेकविधोस्ति। परं तु तस्यापि खलु द्वौ भेदौ मुख्यौस्तः। एको परमपुरुषार्थसिद्धयर्थो ऽर्थाद्य ईश्वरस्तुतिप्रार्थनोपासनाज्ञापालनधर्मानुष्ठानज्ञानेन मोक्षमेव साधयितुं प्रवर्त्तते अपरो लोकव्यवहारसिद्धये यो धर्मेणार्थकामौ निर्वर्त्तयितुं संयोज्यते। स सदा परमेश्वरस्य प्राप्तिमेव फलमुद्दिश्य क्रियते तदा ऽयं श्रेष्ठफलापन्नो निष्कामसंज्ञां लभते। अस्य खल्वनन्तसुखेन योगात्। यदा चार्थकामफलसिद्धयवसानो लौकिकसुखाय योज्यते तदा स ऽपरः सकामएव भवति। अस्य जन्ममरणफलभोगेन युक्तत्वात्। स चाग्निहोत्रमारभ्याश्वमेधपर्य्यन्तेषु यज्ञेषु सुगन्धिमिष्टपुष्टरोगनाशकगुणैर्युक्तस्य सम्यक् संस्कारेण शोधितस्य द्रव्यस्य वायुवृष्टिजलशुद्धिकरणार्थमग्नौ होमः क्रियते स तद्द्वारा सर्वजगत्सुखकार्य्येव भवति। यं च भोजनाच्छादनयानकलाकौशलयंत्रसामाजिकनियमप्रयोजनसिद्ध्यर्थं विधत्ते सं अधिकतया स्वसुखायैव भवति॥

अत्र पूर्वमीमांसायाः प्रमाणम्। द्रव्यसंस्कार कर्मसु परार्थत्वात् फलश्रुतिरर्थवादः स्यात्॥ अ० ४ पा० ३ सू० १। द्रव्याणां तु क्रियार्थानां संस्कारः क्रतुधर्मः स्यात्॥ अ० ४ पा० ३ सू० ८। अनयोरर्थः

द्रव्य संस्कारः कर्मचैतत्त्रयं यज्ञकर्त्रा कर्त्तव्यम्। द्रव्याणि पूर्वोक्तानि चतुःसंख्याकानि सुगंधादिगुणयुक्तान्येव गृहीत्वा तेषां परस्परमुत्तमोत्तमगुणसंपादनार्थं संस्कारः कर्त्तव्यः। यथा सूपादीनां संस्कारार्थं सुगंधयुक्तं घृतं चमसे संस्थाप्याग्नौ प्रतप्य स धूमे जाते सति तं सूपपात्रे प्रवेश्य तन्मुखं बद्ध्वा प्रचालयेच्च तदा यः पूर्वं धूमवद्बाष्पउत्थितः स सर्वः सुगंधो हि जलं भूत्वा प्रविष्टः तं सर्वं सूपं सुगंधमेव करोति तेन पुष्टिरुचिकरश्च भवति। तथैव यज्ञाद्योबाष्पो जायते स वायुं वृष्टिजलं च निर्दोषं कृत्वा सर्वजगते सुखायैव भवति। अतश्चोक्तम्। यज्ञोपि तस्यै जनतायै कल्पते यत्रैवं विद्वान् होता भवति। ऐ० ब्रा० पं० १ अ० २। जनानां समूहो जनता तत्सुखायैव यज्ञो भवति यस्मिन्यज्ञे ऽमुना प्रकारेण विद्वान् संस्कृतद्रव्याणामग्नौ होमं करोति। कुतः। तस्य परार्थत्वात्। यज्ञः परोपकारायैव भवति। अतएव फलस्य स्तुतिः श्रवणमर्थवादो ऽनर्थवारणाय भवति। तथैव होमक्रियार्थानां द्रव्याणां पुरुषाणां च यः संस्कारो भवति स एव क्रतुधर्मो बोध्यः। एवं क्रतुनायज्ञेन धर्मो जायते नान्यथेति॥

अत्र प्रमाणम्। अग्नेर्वै धूमो जायते धूमादभ्रमभ्राद्वृष्टिरग्नेर्वा एता जायन्ते तस्मादाहतपोजा इति। श० कां० ५ अ० ३। अस्यायमभिप्रायः अग्नेः सकाशाद्धूमबाष्पौ जायेते यदा यमग्निर्वृक्षौषधिवनस्पतिजलादिपदार्थान्प्रविश्यतान्संहतान् विभिद्य तेभ्यो रसं च पृथक् करोति। पुनस्ते लघुत्वमापन्ना वाय्वाधारेणोपर्य्याकाशं गच्छन्ति। तत्र यावान् जलरसांशस्तावतो बाष्पसंज्ञास्ति। यश्च निःसेहोभागः स पृथिव्यंशोस्ति। अत एत्रोभयभागयुक्ता धूमइत्युपचर्य्यते। पुनर्धूमगमनानन्तरमाकाशे जलसंचयो भवति। तस्मादभ्रं घना जायन्ते। तेभ्यो वायुदलेभ्यो वृष्टिर्जायते। अतोग्नेरेवैतायवादय। ओषधयो जायन्ते ताभ्यो ऽन्नमन्नादीर्य्यं वीर्य्याच्छरीराणि भवन्तीति॥

अत्र विषये तैत्तिरीयोपनिषद्यप्युक्तम्। तस्माद्वा एतस्मादात्मन आकाशः संभूतः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी

पृथिव्या ओषधयः ओषधिभ्यो ऽन्नं अन्नाद्रेतः रेतसः पुरुषः स वा एष पुरुषो ऽन्नरसमयः। आनन्दवल्ल्यां प्रथमेऽनुवाके ॥ स तपोतप्यततपस्त्- प्ता अन्नं ब्रह्मेति विजानात्। अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते अन्नेन जातानि जीवन्ति अन्नं प्रयंत्यभिसंविशंतीति भृगुवल्ल्यां द्वितीये- नुवाके। अन्नं ब्रह्मेत्युच्यते जीवनस्य बृहद्धेतुत्वात् शुद्धान्नजलवाय्वादिद्वा- रैव प्राणिनां सुखं भवति नातोन्यथेति ॥

तत्र द्विविधः प्रयत्नोस्तीश्वरकृतो जीवकृतश्च। ईश्वरेण खल्वग्नि- मयः सूर्यो निर्मितः सुगंधपुष्पादिश्च स निरन्तरं सर्वस्माज्जगतो रसा- नाकर्षति। तस्य सुगंधदुर्गंधाणुसंयोगत्वेन तज्जलवायू अपीष्टानिष्टगुण- योगान्मध्यगुणौ भवतस्तयोः सुगन्धदुर्गंधमिश्रितत्वात्। तज्जलवृष्टावो- षध्यन्नरेतः शरीराण्यपि मध्यमान्येव भवन्ति। तन्मध्यमत्वाद्बलबुद्धिवी- र्य्यपराक्रमधैर्य्यशौर्य्यादयोपि गुणा मध्यमा एव जायन्ते। कुतः। यस्य यादृशं कारणमस्ति तस्य तादृशमेव कार्य्यं भवतीति दर्शनात्। अयं खल्वीश्वरसृष्टेर्दोषो नास्ति। कुतः। दुर्गंधादिविकारस्य मनुष्य सृष्ट्य न्तर्भावात्। यतो दुर्गन्धादिविकारस्योत्पत्तिर्मनुष्यादिभ्य एव भवति तस्मादस्य निवारणमपि मनुष्यैरेव करणीयमिति। यथेश्वरेणाज्ञा दत्ता सत्यभाषणमेव कर्त्तव्यं नानृतमिति यस्तामुल्लंघ्य प्रवर्त्तते स पापीया न्भूत्वा क्लेशं चेश्वरव्यवस्थया प्राप्नोति। तथा यज्ञः कर्त्तव्य इतीयमप्या ज्ञातेनैव दत्तास्ति तामपि य उल्लंघयति सोपि पापीयान्सन् क्लेशवांश्च भवति ॥

कुतः सर्वोपकाराकरणात्। यत्र खलु यावान्मनुष्यादिप्राणिसमुदा यो भवति तत्र तावानेव दुर्गंधसमुदायो जायते न चैवायमीश्वरसृष्टि- निमित्तो भवितुमर्हति। कुतः। तस्य मनुष्यादिप्राणिसमुदायनिमित्तो- त्पन्नत्वात्। यत्तु खलु मनुष्याः स्वसुखार्थं हस्त्यादिप्राणिनामेकत्रबाहु- ल्यं कुर्वन्ति। अतस्तज्जन्योप्यधिको दुर्गन्धो मनुष्यसखेसुखेच्छानिमित्त- एव जायते। एवं वायुवृष्टिजलदूषकः सर्वो दुर्गन्धो मनुष्यनिमित्तादेवो- त्पद्यते ऽतस्तस्य निवारणमपि मनुष्या एवकर्त्तुमर्हन्ति ॥

गुरु विरजानन्द दण्डी
सन्दर्भ पुस्तकालय
परिग्रहण क्रमांक ....(..२४. 199
... महिला महाविद्यालय, ...

... मध्ये मनुष्या एवोपकारानुपकारौ वेदितुमर्हाः सन्ति। मननं विचारस्तद्योगादेव मनुष्यत्वं जायते। परमेश्वरेण हि सर्वदेहधारिप्राणिनां मध्ये मनस्विनो विज्ञानं कर्तुं योग्या मनुष्या एव सृष्टास्तद्देहेषु परमाणुसंयोगविशेषेण विज्ञानभवनानुकूलानामवयवानामुत्पादितत्वात्। अतस्त एव धर्माधर्मयोर्ज्ञानमनुष्ठानाननुष्ठाने च कर्त्तुमर्हन्ति न चान्ये। अस्मात्कारणात्सर्वोपकाराय सर्वैर्मनुष्यैर्यज्ञः कर्त्तव्य एव॥

किंच भोः कस्तूर्य्यादीनां सुरभियुक्तानां द्रव्याणामग्नौ प्रक्षेपणेन विनाशात्कथमुपकाराय यज्ञो भवितुमर्हतीति। किं त्वादृशैरुत्तमैः पदार्थैर्मनुष्यादिभ्यो भोजनादिदानेनोपकारे कृते होमादप्युत्तमं फलं जायते पुनः किमर्थं यज्ञकरणमिति। अत्रोच्यते। नात्यन्तो विनाशः कस्यापि संभवति। विनाशो हि यद्दृश्यं भूत्वा पुनर्न दृश्येतेति विज्ञायते। परन्तु दर्शनं त्वया कतिविधं स्वीक्रियते। अष्टविधं चेति। किंच तत्। अत्राहुर्गोतमाचार्यो न्यायशास्त्रे। इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारिव्यवसायात्मकं प्रत्यक्षम्॥१॥ अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत्सामान्यतो दृष्टं च॥२॥ प्रसिद्धसाधर्म्यात्साध्यसाधनमुपमानम्॥३॥ आप्तोपदेशः शब्दः॥४॥ अ०१ आह्निकम्।१। सू० ४।५।६।७। प्रत्यक्षानुमानोपमानशब्दैतिह्यार्थापत्तिसंभवाभावसाधनभेदादष्टधाप्रमाणं मया मन्यतइति। तत्र यदीन्द्रियार्थसंबन्धात्सत्यमव्यभिचारिज्ञानमुत्पद्यते तत्प्रत्यक्षम्। सन्निकटे दर्शनान्मनुष्योयं नान्य इत्याद्युदाहरणम्।१। यत्र लिङ्गज्ञानेन लिङ्गितो ज्ञानं जायते तदनुमानम्। पुत्रं दृष्ट्वा ऽऽसीदस्य पितेत्याद्युदाहरणम्।२। उपमानं सादृश्याज्ज्ञानं यथा देवदत्तोस्ति तथैव यज्ञदत्तोप्यस्तीति साधर्म्यादुपदिशतीत्याद्युदाहरणम्।३। शब्द्यते प्रत्याय्यते दृष्टो ऽदृष्टश्चार्थो येन स शब्दः। ज्ञानेन मोक्षो भवतीत्याद्युदाहरणम्॥४॥

न च तुष्टमैतिह्यार्थापत्तिसंभवाभावप्रामाण्यात्॥५॥ शब्दऐतिह्यानर्थान्तरभावादनुमानेर्थापत्तिसंभवाभावानर्थान्तरभावाच्चाप्रतिषेधः

॥ ६ ॥ अ० २ आ० २ । सू० १ । २ । न च तुष्टमिति सूत्रद्वयस्य संक्षिप्तोर्थः क्रियते । ( ऐतिह्यं ) शब्दोपगतमाप्तोपदिष्टं ग्राह्यम् । देवासुराः संयत्ता आसन्नित्यादि, ॥ ५ ॥ ( अर्थापत्तिः ) अर्थादापद्यते सार्थापत्तिः केनचिदुक्तं सत्सु घनेषु वृष्टिर्भवतीति किमत्र प्रसज्यते असत्सु घनेषु न भवतीत्याद्युदाहरणम्, ॥ ६ ॥ ( संभवः ) संभवति येन यस्मिन्वाससंभवः केन चिदुक्तं मातापितृभ्यां संतानं जायते संभवोस्तीति वाच्यम् । परन्तु कश्चिद्ब्रूयात्कुंभकरणस्य क्रोशचतुष्टय पर्य्यन्तं श्मश्रुणः केशा ऊर्द्ध्वं स्थिता आसन् षोड़शक्रोशमूर्द्ध्वं नासिका चासंभवत्वान्मिथ्यैवास्तीति विज्ञायते । इत्याद्युदाहरणम् ॥ ७ ॥ ( अभावः ) कोऽपि ब्रूयाद् घटमानयेति स तत्र घटमपश्यन्नत्र घटो नास्तीत्यभावलक्षणेन यत्र घटो वर्त्तमानस्तस्मादानीयते ॥ ८ ॥ इति प्रत्यक्षादीनां संक्षेपतोर्थः । एवमष्टविधं दर्शनमर्थाज्ज्ञानं मया मन्यते सत्यमेवमेतत् । नैवमंगीकारेण विना समयो व्यवहारपरमार्थौ कस्यापि सिध्येताम् ॥

यथा कश्चिदेकं मृत्पिण्डं विशेषतश्चूर्णीकृत्य वेगयुक्ते वायौ वाह्वेगेनाकाशं प्रतिक्षिपेत्तस्य नाशो भवतीत्युपचर्य्यते । चक्षुषा दर्शनाभावात् (णश) अदर्शने अस्माद् घञ्प्रत्यये कृते नाश इति शब्दः सिध्यति । अतो नाशो बाह्येन्द्रियाऽदर्शनमेव भवितुमर्हति । किंच यदा परमाणवः पृथक् २ भवन्ति तदा ते चक्षुषा नैव दृश्यन्ते तेषामतीन्द्रियत्वात् । यदा चैते मिलित्वा स्थूलभावमापद्यन्ते तदैव तद्द्रव्यं दृष्टिपथमागच्छति स्थूलस्यैन्द्रियकत्वात् । यद्द्रव्यं विभक्तं विभक्तमन्तरा विभागानर्हं भवति तस्य परमाणुसंज्ञा चेति व्यवहारः तेहि विभक्ता अतीन्द्रियाः सन्त आकाशे वर्त्तन्त एव ॥

तथैवाग्नौ यद्द्रव्यं प्रक्षिप्यते तद्विभागं प्राप्य देशान्तरे न हितस्याभावः कदाचिद्भवति । एवं यद्गंधादिदोष
द्रव्यमस्ति तच्चाग्नौ हुतं सद्वायोर्वृष्टिजलस्य शुद्धि

र्निर्दोषे सति सृष्टये महानुपकारो भवति सुखं चातःकारणाद्यज्ञः कर्त्तव्य एवेति। किंच भोः । वायुवृष्टिजलशुद्धिकरणमेव यज्ञस्य प्रयोजनमस्ति चेत्तर्हि गृहाणांमध्ये सुगंधद्रव्यरक्षणेनैतत्सेत्स्यति पुनः किमर्थमेतावानाडम्बरः । नैवं शक्यम्। नैव तेनाशुद्धो वायुः सूक्ष्मो भूत्वाऽऽकाशं गच्छति तस्य पृथक्त्वलघुत्वाभावात्। तत्र तस्य स्थितौ सत्यां नैव बाह्यो वायुरागन्तुं शक्नोत्यवकाशाभावात्। तत्र पुनः सुगंधदुर्गंधयुक्तस्य वायोर्वर्त्तमानत्वादारोग्यादिकं फलमपि भवितुमशक्यमेवास्ति।

यदा तु खलु तस्मिन् गृहेऽग्निमध्ये सुगंध्यादिद्रव्यस्य होमः क्रियते तदाऽग्निना पूर्वो वायुर्भेदं प्राप्य लघुत्वमापन्न उपर्याकाशं गच्छति। तस्मिन् गते सति तत्रावकाशत्वाच्चतसृभ्यो दिग्भ्यः शुद्धो वायुरागच्छति तेन गृहाकाशस्य पूर्णत्वादारोग्यादिकं फलमपि जायते॥

यो होमेन सुगंधयुक्तद्रव्यपरमाणुयुक्त उपरिगतो वायुर्भवति स वृष्टिजलं शुद्धं कृत्वा वृष्ट्याधिक्यमपि करोति तद्द्वारौषध्यादीनां शुद्धेरुत्तरोत्तरं जगति महत्सुखं वर्धतइति निश्चीयते। एतत्खल्वग्निसंयोगरहितसुगंधेन वायुना भवितुमशक्यमस्ति तस्माद्धोमकरणमुत्तममेव भवतीति निश्चेतव्यम्॥

अन्यच्च दूरस्थले केनचित्पुरुषेणाग्नौ सुगंधद्रव्यस्य होमः क्रियते तद्युक्तो वायुर्दूरस्थमनुष्यस्य घ्राणेन्द्रियेण संयुक्तो भवति। सोऽत्र सुगंधो वायुरस्तीति जानात्येव । अनेन विज्ञायते वायुना सह सुगंधं दुर्गंधं च द्रव्यं गच्छतीति । तद्यदा स दूरं गच्छति तदा तस्य घ्राणेन्द्रियसंयोगो न भवति पुनर्बालबुद्धीनां भ्रमो भवति स सुगंधो नास्तीति परन्तु तस्य हुतस्य पृथग्भूतस्य वायुस्थस्य सुगंधयुक्तस्य द्रव्यस्य देशांतरे वर्त्तमानत्वं विज्ञायते। अन्यदपि खलु होमकरणस्य बहुविधमुत्तमं फलं विचारेण बुधैर्विज्ञेयमिति॥

विज्ञेयम्। परंत्वयं नियमः कर्म्मकाण्डं प्रत्यस्ति कर्म्मकाण्डस्य निष्कामभागेपि च परमेश्वरप-

वेष्टदेवोस्ति। कस्मात्। तत्र तस्यैव प्राप्तिः प्रार्थ्यते। यश्च तस्य सकामो भागोस्ति तत्रेष्टविषयभोगप्राप्तये परमेश्वरः प्रार्थ्यते। अतःकारणाद्भेदो भवति। परन्तु नैवेश्वरार्थत्यागः क्वापि भवतीति वेदाभिप्रायोस्ति॥

युञ्जते मन उत युंजते धियो विप्रा विप्रस्य बृहतो विपश्चितः। विहोत्रा दधेवयुना विदेक इन्मही देवस्य सवितुः परिष्टुतिः॥ १॥ ऋ॰ अ॰ ४ अ॰ ४ व॰ २१ मं॰ १॥ युञ्जानः प्रथमं मनस्तत्त्वाय सविता धियम्। अग्नेर्ज्योतिर्निचाय्य पृथिव्या अध्याभरत्॥ २॥ युक्तेन मनसा वयं देवस्य सवितुः सवे॥ स्वर्ग्याय शक्त्या॥३। युक्त्वाय सविता देवान्त्स्वर्यतो धिया दिवं॥ बृहज्ज्योतिः करिष्यतः सविता प्रसुवाति तान्॥ ४॥ युजे वां ब्रह्म पूर्व्यं नमोभिर्विश्लोक एतु पथ्येव सूरेः॥ शृण्वन्तु विश्वे अमृतस्य पुत्रा आये धामानि दिव्यानि तस्थुः। ५॥ य॰ अ॰ ११ मं॰॥ १॥ २॥ ३॥ ४॥ ५॥

॥ भाष्यम्॥

( युञ्जते॰ ) अस्माभि॰ अत्र जीवेन सदा परमेश्वरस्यैवोपासनं कर्त्तव्येति विधीयते ( विप्राः ) ईश्वरोपासका मेधाविनः ( होत्राः

ोगिनोमनुष्याः (विप्रस्य०) सर्वज्ञस्य परमेश्वरस्य मध्ये (मनः) (युञ्जते)
ुक्तं कुर्वन्ति (उत) अपि धियाबुद्धिवृत्तिस्तस्यैव मध्ये युंजते। कथंभूतः
। परमेश्वरः सर्वमिदं जगत् यः ( विदधे ) विदधे तथा ( वयुनावि० )
र्वेषां जीवानां शुभाशुभानि यानि प्रज्ञानानि प्रजाश्च तानि यो वेद
। वयुना वित् ( एकः ) स एकोऽद्वितीयोस्ति ( इत् ) सर्वत्र व्याप्तो
ानस्वरूपश्च नास्मात्पर उत्तमः कश्चित् पदार्थो वर्त्तत इति। तस्य
देवस्य ) सर्वजगत्प्रकाशकस्य ( सवितुः ) सर्वजगदुत्पादकस्येश्वरस्य
र्वैर्मनुष्यैः ( परिष्टुतिः ) परितः सर्वतः स्तुतिः कार्य्या कथंभूता स्तुतिः
मही ) महतीत्यर्थः एवं कृतेसति जीवाः परमेश्वरमुपगच्छन्तीति॥
॥ (युंजानो) योगं कुर्वाणः सन् (तत्त्वाय) ब्रह्मादितत्त्वज्ञानाय प्रथमं
ंजानः सन् योस्ति तस्य धियं (सविता) कृपया परमेश्वरःस्वस्मिन्नुपयुंक्ते
अग्नेर्ज्योतिः) प्रकाशस्वरूपं यतोऽग्नेरीश्वरस्य (ज्योतिः) (निचाय्य)
याथावत् निश्चित्य (अध्याभरत्) स योगी स्वात्मनि परमात्मानं धारितवान्
वेत् इदमेव पृथिव्यामध्ये योगिन उपासकस्य लक्षणमिति वेदितव्यम्
२॥ सर्वे मनुष्या एव मिच्छेयुः ( स्वर्ग्याय० ) मोक्षसुखाय ( शक्त्या )
ोगबलोन्नत्या (देवस्य) स्वप्रकाशस्यानन्दप्रदस्य (सवितुः) सर्वान्तर्या-
मिनः परमेश्वरस्य ( सवे ) अनन्तैश्वर्य्ये ( युक्तेन मनसा० ) योगयु-
क्तेन शुद्धान्तःकरणेन वयं सदोपयुञ्जीमहीति ॥ ३ ॥ एवं योगाभ्यासेन
तेन ( स्वर्यतः ) शुद्धभावप्रेम्णा ( देवान् ) उपासकान् योगिनः ( स-
विता ) अन्तर्यामीश्वरः कृपया ( युक्त्वाय० ) तदात्मसु प्रकाशकरणेन
सम्यग् युक्त्वा ( धिया ) स्वकृपाधारवृत्त्या ( बृहज्ज्योतिः ) अनन्तप्रकाशं
दिवं ) दिव्यम् स्वस्वरूपम् (प्रसुवाति) प्रकाशयति तथा (करिष्यतः)
त्यभक्तिं करिष्यमाणानुपासकान्योगिनः ( सविता ) परमकारुणि-
कान्तर्यामीश्वरो मोक्षदानेन सदा नन्दयतीति ॥ ४ ॥ उपासना प्रदो-
ासना ग्रहीतारौ प्रति परमेश्वरः प्रति जानीते ( ब्रह्म पूर्व्यम् ) यदा
ौ पुरातनं सनातनं ब्रह्म ( नमोभिः ) स्थिरेणात्मना सत्यभावेन नम-
स्कारैरुपासाते तदा तद्ब्रह्म ताभ्यामाशीर्ददाति (श्लोकः) सत्यकीर्त्तिः

( वां ) ( वि ) ( एतु ) व्येतु व्याप्नोतु कस्य केव ( सूरेः ) परमविदुषः ( पथ्येव ) धर्ममार्गइव ( ये ) एवं य उपासकाः ( अमृतस्य ) मोक्षस्वरूपस्य नित्यस्य परमेश्वरस्य ( पुत्राः ) तदा ज्ञानुष्ठातारस्तत्सेवकाः सन्ति तएव (दिव्यानि) प्रकाशस्वरूपाणिविद्योपासनायुक्तानि कर्माणि तथा दिव्यानि (धामानि) सुखस्वरूपाणि जन्माणि सुखयुक्तानि स्थानानि वा ( आतस्थुः ) आसमन्तात् तेषु स्थिरा भवन्ति ते (विश्वे०) सर्वे ( वां ) उपासनोपदेष्टपदेश्यौ द्वौ (शृखन्तु) प्रख्यातौ जानन्तु । इत्यनेन प्रकारेणोपासना कुर्वाणौ वां युवां द्वौ प्रतीश्वरोऽहं युजे कृपया समवेतो भवामीति ॥ ५ ॥

**अष्टाविंशानि शिवानि शग्मानि सहयोगं भजन्तु मे । योगं प्रपद्ये क्षेमं च क्षेमं प्रपद्ये योगं च नमोऽहोरात्राभ्यामस्तु ॥ ६ ॥ अथर्व० कां०१९ ॥ अनु०१ व०८ मं०२॥भूयानरात्याः शच्याः पतिस्त्वमिन्द्रासि विभूः प्रभूरितित्वोपास्महे वयम् ॥ ७ ॥ नमस्ते अस्तु पश्यत पश्य मा पश्यत ८ ॥ अन्नाद्येन यशसा तेजसा ब्राह्मणवर्चसेन ॥ ९ ॥**

## ॥ भाष्यम् ॥

अष्टाविंशानि०) हे परमेश्वर भगवन् कृपयाऽष्टाविंशानि (शिवानि०) कल्याणानि कल्याणकारकाणि सन्त्वर्थाद्दशेन्द्रियाणि दशप्राणा मनोबुद्धिचित्ताहंकारविद्यास्वभावशरीरबलं चेति (शग्मानि०) सुखका-

रक्षाणि भूत्वा (अहोरात्राभ्यां) दिवसे रात्रौ चोपासनाव्यवहारं योगं (मे) मम (भजन्तु) सेवन्ताम् तथा भवत्कृपया ऽहं (योगं प्र०) प्राप्य (क्षेमं च) प्रपद्ये क्षेमं प्राप्ययोगं च प्रपद्ये । यतोऽस्माकम् सहायकारी भवान्भवेदेतदर्थं सततं नमोस्तु ते ॥ ६ ॥ इमे वक्ष्यमाणाश्च मंत्रा अथर्ववेदस्य सन्तीति बोध्यम् ॥ (इन्द्रा) हे इन्द्र परमेश्वर त्वं (शच्याः) प्रजाया वाण्या कर्मणो वा पतिरसि तथा (भूयान्) सर्वशक्तित्वात्सर्वोत्कृष्टत्वादतिशयेन वहुरसि तथा (अरात्याः) शत्रुभूताया वाण्यास्तादृशस्य कर्मणो वा शत्रुरर्थाद्भयान्निवारकोसि (विभूः) व्यापकः (प्रभूः) समर्थश्चासि (इति) अनेन प्रकारेणैवंभूतं (त्वा) त्वां (वयम्) सदैव (उपास्महे) अर्थात्तवैवोपासनं कुर्महे इति ॥ ७ ॥ अत्र प्रमाणम् । वाचो नामसु शचीति पठितं ॥ निघंटु० अ० १ । खं० ११ तथा कर्मणां नामसु शचोति पठितम्० निघं० अ० २ खं० १ ॥ तथा प्रजानामसु शचीति पठितं० निघं० अ० ३ खं० ६ ॥ ईश्वरोभिवदति हे मनुष्या यूयमुपासनारीत्या सदैव (मा) मां (पश्यत) सम्यग् ज्ञात्वा चरत उपासक एवं जानीयाद्वदेच्च हे परमेश्वरानन्तविद्यायुक्त (नमस्ते अस्तु) ते तुभ्यमस्माकं सततं नमोऽस्तु भवतु ॥ ८ ॥ (अन्नाद्येन) कस्मै प्रयोजनायान्नादिराज्यैश्वर्य्येण (यशसा) सर्वोत्तम सत्कर्मानुष्ठानोद्भूत सत्यकीर्त्या (तेजसा) निर्दीनतया प्रागल्भ्येण च (ब्राह्मणवर्चसेन) पूर्णविद्ययासह वर्त्तमानानस्मान् हे परमेश्वर त्वं कृपया सदैव (पश्य) संप्रेक्षस्वैतदर्थं वयं (त्वां) सर्वदोपास्महे ॥ ६ ॥

अम्भो अमो महः सह इति त्वोपास्महे वयम् ॥१०॥

अम्भो अरुणं रजतं रजः सह इति त्वोपास्महे वयम् ॥११॥

उरुः पृथुः सुभूर्भुव इति त्वोपास्महे वयम् ॥ १२ ॥ प्रथो वरो व्यचोलोक इति त्वोपास्महे वयम् ॥ १३ ॥ अथर्व० कां० १३ अनु० ४ मं० ४७ । ४८ । ४६ । ५० । ५१ । ५२।५३

(हे ब्रह्मन्) (अम्भः) व्यापकं शान्तस्वरूपं जलवत् प्राणस्यापि प्राणम्। आप्लृ धातोरसुन् प्रत्ययान्तस्यायं प्रयोगः॥ (अमः) ज्ञानस्वरूपम् (महः) पूज्यं सर्वेभ्यो महत्तरं (सहः) सहनस्वभावं ब्रह्म (त्वा) त्वां ज्ञात्वा (इति) अनेन प्रकारेण (वयं) सततं उपास्महे ॥ १० ॥ (अम्भः) आदरार्थो द्विरारम्भः अस्यार्थ उक्तः (अरुणम्) प्रकाशस्वरूपम् (रजतम्) रागविषयमानन्दस्वरूपम् (रजः) सर्वलोकैश्वर्य्यसहितम् (सहः) सहनशक्तिप्रदम् (इति त्वोपास्महे वयम्) त्वां विहाय नैव कश्चिदन्योऽर्थः कस्यचिदुपास्योऽस्तीति ॥ ११ ॥ (उरुः) सर्वशक्तिमान् (पृथुः) अतीव विस्तृतो व्यापकः (सुभूर्भुवः) सुष्ठुतया सर्वेषु पदार्थेषु भवतीति सुभूः अन्तरिक्षवदवकाशरूपत्वाद्भुवः (इति) एवं ज्ञात्वा (त्वो०) त्वां (उपास्महे वयं) ॥ १२ ॥ बहुनामसु (उरुरिति प्रत्यक्षमस्ति। निघण्टु। अ० ३। खं० १ (प्रथः) सर्वजगत्प्रसारकः (वरः) श्रेष्ठः (व्यचः) विविधतया सर्वं जगज्जानातीति (लोकः) लोक्यते सर्वैर्जनैर्लोकयति सर्वान् वा (इति त्वो०) वयमीदृक्स्वरूपं सर्वज्ञं त्वामुपास्महे ॥ १३ ॥

इदानीमुपासना कथंरीत्या कर्त्तव्येति लिख्यते। तत्र शुद्धएकान्तेऽभीष्टेदेशे शुद्धमानसः समाहितो भूत्वा सर्वाणीन्द्रियाणि मनश्चैकाग्रीकृत्य सच्चिदानन्दस्वरूपमन्तर्यामिनं न्यायकारिणं परमात्मानं सञ्चिन्त्य तत्रात्मानं नियोज्य च तस्यैव स्तुतिप्रार्थनानुष्ठाने सम्यक्कृत्वोपासनयेश्वरे पुनः २ स्वात्मानं संलगयेत्। अत्र पतञ्जलिमहामुनिना स्वकृतसूत्रेषु वेदव्यासकृतभाष्ये चायमनुक्रमो योगशास्त्रे प्रदर्शितः। तद्यथा। योगश्चित्तवृत्तिनिरोधः॥ १ ॥ अ० १ पा० १ सू० २ ॥ उपासनासमये व्यवहारसमये वा परमेश्वरादतिरिक्तविषयादधर्मव्यवहाराच्च मनसोवृत्तिः सदैव निरुद्धा रक्षणीयेति। निरुद्धासती सा क्वावतिष्ठत इत्यत्रोच्यते॥ १ ॥ तदा द्रष्टुः स्वरूपेऽवस्थानम् ॥ २ ॥ अ० १ पा० १ सू० ३ ॥ यदा सर्वस्माद्व्यवहारान्मनोऽवरुध्यते तदास्योपासकस्य मनो द्रष्टुः सर्वज्ञस्य परमेश्वरस्य स्वरूपे स्थितिं लभते ॥ २ ॥ यदोपासको

योग्युपासनां विहाय सांसारिकव्यवहारे प्रवर्त्तते तदा सांसारिकजनवत्तस्यापि प्रवृत्तिर्भवत्याहोस्विद्विलक्षणेत्यत्राह ॥ वृत्तिसारूप्यमितरत्र ॥ ३ ॥ अ० १ पा० १ सू० ४ ॥ इतरत्र सांसारिकव्यवहारे प्रवृत्तेप्युपासकस्य योगिनः शान्ता धर्मारूढा विद्या विज्ञानप्रकाशा सत्यतत्त्वनिष्ठा ऽतीव तीव्रा साधारणमनुष्य विलक्षणा ऽपूर्वैव वृत्तिर्भवतीति । नैवेदृश्यनुपासकानामयोगिनां कदाचिद्वृत्तिर्जायत इति ॥ ३ ॥ कतिवृत्तयः सन्ति कथं निरोद्धव्या इत्यत्राह ॥ वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः ॥ ४ ॥ प्रमाणविपर्ययविकल्पनिद्रास्मृतयः ॥ ५ ॥ तत्र प्रत्यक्षानुमानागमाः प्रमाणानि ॥ ६ ॥ विपर्य्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम् ॥ ७ ॥ शब्दज्ञानानुपातीवस्तुशून्यो विकल्पः ॥ ८ ॥ अभावप्रत्यया लम्बनावृत्तिर्निद्रा ॥ ९ ॥ अनुभूतविषया संप्रमोषः स्मृतिः ॥ १० ॥ अभ्यासवैराग्याभ्यां तन्निरोधः ॥ ११ ॥ अ० १ पा० १ सू० ५ । ६ । ७ । ८ । ९ । १० । ११ १२ ॥ उपासनायाः सिद्धेः सहायकारिपरमंसाधनं किमस्तीत्यत्रोच्यते ॥ ईश्वरप्रणिधानाद्वा ॥ १२ ॥ अ० १ पा० १ । सू० २३ । भा० प्रणिधानाद्भक्तिविशेषादावर्त्तित ईश्वरस्तमनुगृह्णात्यभिध्यानमात्रेण तदभिध्यानादपि योगिनः आसन्न तमः समाधिलाभः फलञ्च भवतीति ॥ १२ ॥

किंचास्य भवति । ततः प्रत्यक् चेतनाधिगमो ऽप्यन्तराया भावश्च ॥ १८ ॥ अ० १ पा० १ सू० २९ ॥ भा० येतावदन्तरायाः व्याधिप्रभृतयस्ते तावदीश्वरप्रणिधानान्न भवन्ति स्वरूपदर्शनमप्यस्य भवति यथैवेश्वरः पुरुषः शुद्धः प्रसन्नः केवलः अनुपसर्गः तथायमपि बुद्धेः प्रतिसंवेदीयः पुरुष इत्येवमधिगच्छति । अथ के ऽन्तरायाः ये चित्तस्य विक्षेपकाः के पुनस्ते कियन्तो वेति ॥ १८ व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रांतदर्शनालब्धभूमिकत्वानवस्थितत्वानिचित्तविक्षेपास्ते ऽन्तरायाः ॥ १९ ॥ अ० १ पा० १ सू० ३० ॥ भा० नवांतरायाश्चित्तस्य विक्षेपाः सहैते चित्तवृत्तिभिर्भवंत्येतेषामभावेनभवंति पूर्वोक्ताश्चितवृत्तयः व्याधिर्धा तुरसकरणवैषम्यं, स्त्यानमकर्मण्यता, चित्तस्य संशय उभयकोटिस्पृक् विज्ञानं स्यादिदम् एवं नैवं स्यादिति । प्रमादः समाधिसाधनानामभावनम्

( आलस्य ) कायस्य चित्तस्य च गुरुत्वादप्रवृत्तिः । अविरतिश्चित्तस्य विषयसंप्रयोगात्मागर्द्धः । भ्रांतिदर्शनं विपर्य्ययज्ञानं अलब्धभूमिकत्वं समाधिभूमेरलाभः । अनवस्थितत्वं यल्लब्धायां भूमौ चित्तस्याप्रतिष्ठासमाधिप्रतिलंभेहि सति तदवस्थितं स्यादिति । एते चित्तविक्षेपाः नवयोगमलाः योगप्रतिपक्षा योगान्तराया इत्याभिधीयन्ते ॥ १८ ॥ दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासाविक्षेपसहभुवः ॥ १८ ॥ अ० १ पा० १ सू० ३१ ॥ भा० दुःखमाध्यात्मिकं, आधिभौतिकं, आधि दैविकं, च येनाभिहताः प्राणिनस्तदुपघाताय प्रयतन्ते तद्दुःखदौर्मनस्यम् । इच्छाभिघाताच्चेतसः क्षोभः । यदङ्गान्येजयति कंपयति तदङ्गमेजयत्वं । प्राणो यद्बाह्यं वायुमाचामति स श्वासः । यत्कौष्ठ्यं वायुं निस्सारयति स प्रश्वासः । विक्षेपसहभुवो विक्षिप्तचित्तस्यैते भवन्ति समाहितचित्तस्यैतेन भवंति । अथैते विक्षेपाः समाधिप्रतिपक्षाः ताभ्यामेवाभ्यां सवैराग्याभ्यां निरोद्धव्याः तत्राभ्यासस्य विषयमुपसंहरन्निदमाह ॥ १८ ॥ तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः ॥ २० ॥ अ० १ पा० १ सू० ३२ ॥ भा० । विक्षेपप्रतिषेधार्थमेकतत्त्वावलंबनचित्तमभ्यसेत् यस्य तु प्रत्यर्थनियतं प्रत्ययमात्रं क्षणिकं च चित्तं तस्य सर्वमेव चित्तं एकाग्रं नास्त्येव विक्षिप्तं यदि पुनरिदं सर्वतः प्रत्याहृत्य एकस्मिन्नर्थे समाधीयते तदा भवत्येकाग्रमित्यतो न प्रत्यर्थनियतं योपि सदृशप्रत्ययप्रवाहेण चित्तमेकाग्रं मन्यते तस्यैकाग्रता यदि प्रवाहचित्तस्य धर्मः तदैकं नास्ति प्रवाहचित्तं क्षणिकत्वात् अथ प्रवाहांशस्यैव प्रत्ययस्य धर्मः स सर्वः सदृशप्रत्ययप्रवाही वा वि सदृशप्रत्यय प्रवाही वा प्रत्यर्थ नियतत्वादेकाग्र एवेति विक्षिप्तचित्तानुपपत्तिः । तस्मादेकमनेकार्थमवस्थितं चित्तमिति यदि च चित्तेनैकेनान्विताः स्वभावभिन्नाः प्रत्यया जायेरन् । अथ कथमन्यप्रत्ययदृष्टस्यान्यः स्मर्त्ता भवेत् । अन्यप्रत्ययोपचितस्य च कर्माशयस्यान्यः प्रत्यय उपभोक्ता भवेत् कथंचित्समाधीयमानमप्येतद्गोमयपायसीयं न्यायमाक्षिपति किंच स्वात्मानुभवापह्नवः चित्तस्यान्यत्वे प्राप्नोति कथं यदहमद्राक्षं तत् स्पृशामि यच्चास्प्राक्षम् तत्पश्यामीति ।

अहमिति प्रत्ययः कथमत्यंतभिन्नेषु चित्तेषु वर्त्तमानः सामान्यमेकं प्रत्ययिनमाश्रयेत् स्वानुभवग्राह्यश्चायमभेदात्मा अहमिति प्रत्ययः नच प्रत्यक्षस्य माहात्म्यं प्रमाणान्तरेणाभिभूयते प्रमाणान्तरञ्च प्रत्यक्षबलेनैव व्यवहारं लभते तस्मादेकमनेकार्थमवस्थितं च चित्तं यस्येदं शास्त्रेण परिणामनिर्दिश्यते तत्कथम् ॥ २० ॥

तेजोसि तेजो मयि धेहि वीर्य्यमसि वीर्य्यं मयि धेहि बलमसि बलं मयि धेहि । ओजोऽस्योजो मयि धेहि मन्युरसि मन्युं मयि धेहि सहोऽसि सहो मयि धेहि ॥ १ ॥ य० अ० १९ मं० ९ ॥ मयीदमिन्द्रइन्द्रियं दधात्वस्मान् रायो मघवानः सचन्ताम् । अस्माकꣳसन्त्वाशिषः सत्यानः सन्त्वाशिषः ॥ २ ॥ य० अ० २ मं० १० । यां मेधां देवगणाः पितरश्चोपासते । तया मामद्य मेधयाऽग्ने मेधाविनं कुरु स्वाहा ॥ ३ ॥ य० अ० ३२ मं० १४ ॥

## ॥ भाष्यम् ॥

अभि० । तेजोसीत्यादिमंत्रेषु परमेश्वरस्य स्तुतिप्रार्थनादिविषयः प्रकाश्यतो इति बोध्यम् (तेजोसि०) हे परमेश्वर त्वं वीर्य्यमस्यनन्तविद्यादिगुणैः प्रकाशमयोसि मय्यप्यसंख्यातं तेजोविज्ञानं धेहि ( वीर्य-मसि० ) हे परमेश्वर त्वं वीर्य्यमस्यनन्तपराक्रमवानसि कृपया मय्यपि

शरीरबुद्धिशौर्य्यस्फूर्त्यादि वीर्य्यं पराक्रमं स्थिरं धारय ( बलम्० ) हे महाबलेश्वर त्वमनन्तबलमसि मय्यप्यनुग्रहत उत्तमं बलं धेहि स्थापय ( ओजो० ) हे परमेश्वर त्वमोजोसि मय्यप्योजः सत्यं विद्याबलं धेहि ( मन्युरसि० ) हे परमेश्वर त्वं मन्युर्दुष्टान्प्रतिक्रोध कृदसि मय्यपि स्वसत्तया दुष्टान्प्रति मन्युं धेहि ( सहोसि० ) हे सहनशीलेश्वर त्वं सहोसि मय्यपि सुखदुःखयुद्धादिसहनं धेहि। एवं कृपयैतदादिशुभान्-गुणान्मह्यं देहीत्यर्थः ॥ १ ॥ ( मयीदमिन्द्र० ) हे इन्द्र परमैश्वर्य्यवन्-परमात्मन् मयि मदात्मनि श्रोत्रादिकं मनश्च सर्वोत्तमं भवान् दधातु। तथा ऽस्मांश्च प्रोषयतु। अर्थात्सर्वोत्तमैः पदार्थैः सह वर्त्तमानानस्मान्स-दा कृपया करोतु पालयतु च ( अस्मान् रायो० ) तथा नोस्मभ्यं मघं परमं विज्ञानादिधनं विद्यते यस्मिन्स मघवा भवान् स परमोत्तमं रा-ज्यादिधनमस्मदर्थं दधातु ( सचतां० ) सचतां तच्च चास्मान्समवेतान्-करोतु। तथा भवन्त उत्तमेषु गुणेषु सचंतां समवेता भवंत्वितीश्वरा ऽऽज्ञास्ति ( अस्माकꣳस० ) तथा हे भगवन् त्वत्कृपया ऽस्माकं सर्वा आशिष इच्छाः सर्वदा सत्या भवन्तु मा काचिदस्माकं चक्रवर्त्तिराज्या-नुशासनादय आशिष इच्छामोघा भवेयुः ॥ २ ॥ ( याम्मेधां० ) हे अग्ने परमेश्वर परमोत्तमया मेधया धारणावत्याधिया बुद्ध्या सह (मा) मां मेधाविनं सर्वदा कुरु कामेधेत्युच्यते ( देवगणाः ) विद्वत्समूहाः पितरो विज्ञानिनश्चोपासते ( तया० ) तया मेधया ( अद्य ) वर्त्तमा-नदिने मां सर्वदा युक्तम् कुरु संपादय ( स्वाहा ) अत्र स्वाहाशब्दार्थे प्रमाणं निरुक्तकारा आहुः ॥ स्वाहा कृतयः स्वाहेत्येतत्सु आहेति वा स्वा वागाहेति वा स्वंप्राहेति वा स्वाहुतं हविर्जुहोतीति वा तासामेषा भवति ॥ निरु० अ० ८ खं० २० ॥ स्वाहाशब्दस्यायमर्थः। ( सु आहेति वा ( सु ) सुष्टु कोमलं मधुरं कल्याणकरं प्रियंवचनं सर्वैर्मनुष्यैः सदा वक्तव्यं (स्वावागाहेति वा) या ज्ञानमध्ये स्वकीया वाग्वर्त्तते स यदाह तदेववागिन्द्रियेण सर्वदा वाच्यम्। ( स्वंप्राहेति वा ) स्वं स्वकीयपदा-र्थं प्रत्येव स्वत्वं वाच्यं न परपदार्थं प्रतिचेति ( स्वाहुतं हविर्जुहोतीति

वा ) सुष्ठुरीत्या संस्कृत्य २ हविः सदा होतव्यमिति स्वाहाशब्दपर्य्यायार्थाः ॥ ३ ॥

विश्वानिदेवसवितर्दुरितानिपरासुव ॥ यद्भद्रंतन्नआसुव ॥ १ ॥ यजुर्वेदे । अध्याये ३० मंत्रः ३ ॥

॥ भाष्यम् ॥

हे सच्चिदानन्दानन्तस्वरूप हे परमकारुणिक हे अनन्तविद्य हे विद्याविज्ञानप्रद ( देव ) हे सूर्यादि सर्वजगद्विद्याप्रकाशक हे सर्वानन्दप्रद ( सवितः ) हे सकलजगदुत्पादक ( नः ) अस्माकम् ( विश्वानि ) सर्वाणि ( दुरितानि ) दुःखानि सर्वान्दुष्टगुणांश्च ( परासुव ) दूरे गमय ( यद्भद्रं ) यत्कल्याणं सर्वदुःखरहितं सत्यविद्या प्राप्त्यऽभ्युदय निःश्रेयस सुखकरं भद्रमस्ति ( तन्नः ) अस्मभ्यं ( आसुव ) आसमन्तादुत्पादय कृपया प्रापय । अस्मिन् वेदभाष्यकरणानुष्ठाने ये दुष्टा विघ्नास्तान्प्राप्तेः पूर्वमेवप्रासुव दूरं गमय यच्च शरीरबुद्धिसहायकौशलसत्यविद्याप्रकाशादि भद्रमस्ति तत्स्वकृपाकटाक्षेण हे परब्रह्मन् नो ऽस्मभ्यं प्रापय भवत्कृपाकटाक्षसु सहायप्राप्त्या सत्यविद्योज्ज्वलं प्रत्यक्षादिप्रमाणसिद्धं भवद्रचितानां वेदानां यथार्थं भाष्यं वयं विदधीमहि । तदिदं सर्वमनुष्योपकाराय भवत्कृपया भवेत् । अस्मिन् वेदभाष्ये सर्वेषां मनुष्याणां परमश्रद्धयातरन्ता प्रीतिर्यथास्यात् तथैव भवता कार्यमितप्रोश्म्

योभूतंचभव्यंचसर्वंयश्चाधितिष्ठति ॥ स्व१र्यस्यचकेवलंतस्मैज्येष्ठायब्रह्मणेनमः ॥ १ ॥ यस्यभूमिःप्रमान्तरिक्षमुतोदरम् ॥ दिवंयश्चक्रेमूर्द्धानंतस्मैज्येष्ठायब्रह्मणे-

नमः ॥ २ ॥ यस्यसूर्य्यश्चक्षुश्चन्द्रमाश्चपुनर्णवः ॥ अग्निंयश्चक्र-आस्यं१तस्मैज्येष्ठायब्रह्मणेनमः ॥ ३ ॥ यस्यवातःप्राणापा-नौचक्षुरंगिरसोभवन् ॥ दिशोयश्चक्रेप्रज्ञानीस्तस्मैज्येष्ठा-यब्रह्मणेनमः ॥ ४ ॥ अथर्ववेदसंहितायाम् । कांडे १० प्रपाठके २३ अनुवाके ४ ॥ मं० १ । ३२ । ३३ । ३४ ॥

॥ भाष्यम् ॥

(यो भूतं च०) यो भूतभविष्यद्वर्त्तमानान्कालान् (सर्वं यश्चा-धि०) सर्वं जगच्चाधितिष्ठति सर्वाधिष्ठातासन् कालादूर्ध्वं विराजमा-नोस्ति । (स्वर्य०) यस्य च केवलं निर्विकारं स्वःसुखस्वरूपमस्ति य-स्मिन्दुःखं लेशमात्रमपि नास्ति यदा नन्दघनं ब्रह्मास्ति (तस्मै ज्ये०) तस्मै ज्येष्ठाय सर्वोत्कृष्टाय ब्रह्मणे महतेत्यन्तं नमोस्तु नः ॥ १ ॥ (यस्य-भू०) यस्य भूमिः प्रमा यथार्थज्ञानसाधनं पादाविवास्ति (अन्तरिक्ष-मु०) अन्तरिक्षं यस्योदरतुल्यमस्ति यश्च सर्वस्मादूर्ध्वं सूर्यरश्मिप्रकाश-मयमाकाशं दिवं मूर्द्धानं शिरोवच्चक्रे कृतवानस्ति तस्मै० ॥ २ ॥ (यस्य सू०) यस्य सूर्यश्चन्द्रमाश्चपुनः पुनः सर्गादौ नवीने चक्षुषी इव भवतः । योग्निमास्यं मुखवच्चक्रे कृतवानस्ति । तस्मै० ॥ ३ ॥ (यस्य वातः०) वातःसमष्टिर्वायुर्यस्य प्राणापाना विवास्ति (अंगिरसः) अंगिरा अंगारा अंकना अंचना इति निरुक्ते अ० ३ खं० १७ प्रकाशिकाः किरणाश्चक्षुषी इव भवतः । योदिशः प्रज्ञानीः प्रज्ञापिनीर्व्यवहारसाधिकाश्चक्रे तस्मै ह्यनन्तविद्याय ब्रह्मणे महते सततं नमोस्तु ॥ ४ ॥

य आत्मदाबलदायस्यविश्वउपासतेप्रशिषंयस्यदेवाः यस्यच्छायामृतं यस्यमृत्युःकस्मैदेवायहविषाविधेम ॥ ५ यजुः० अ० २५ मं० १३ ॥

द्यौःशान्तिरान्तरिक्षꣳशान्तिः । पृथिवीशान्तिरापःशान्तिरोषधयःशान्तिः । वनस्पतयःशान्तिर्विश्वेदेवाःशान्तिर्ब्रह्मशान्तिःसर्वꣳशान्तिःशान्तिरेवशान्तिः सामाशान्तिरेधि॥ ६ ॥ यतोयतः समीहसे ततोनो अभयंकुरु । शन्नःकुरुप्रजाभ्यो ऽभयंनःपशुभ्यः ॥ ७ ॥ यजुः० अ० ३६ मं० १७॥ २२ ॥

यस्मिन्नृचःसामयजूꣳषियस्मिन्प्रतिष्ठितारथनाभाविवाराः । यस्मिंश्चित्तꣳ सर्वमोतं प्रजानांतन्मेमनः शिवसंकल्पमस्तु ॥ ८ ॥ यजुः० अ० ३४ मं० ५ ॥

## ॥ भाष्यम् ॥

( य आत्मदाः ) य आत्मदा विद्या विज्ञानप्रदाः ( बलदाः ) यः शरीरेन्द्रियप्राणात्ममनसां पुष्ट्युत्साहपराक्रमदृढत्वप्रदः ( यस्य० ) यं विश्वे देवाः सर्वे विद्वांस उपासते यस्यानुशासनं च मन्यन्ते ।(यस्यच्छाया० ) यस्याश्रयएव मोक्षोस्ति यस्यच्छाया ऽकृपा ऽनाश्रयो मृत्युर्जन्ममरणकारकोस्ति ( कस्मै० ) तस्मै कस्मै प्रजापतये प्रजापतिर्वैकस्तस्मै हविषाविधेमेति । शतपथब्राह्मणे । कांडे ७ अ० ३ ॥ सुखस्वरूपाय ब्रह्मणे देवाय प्रेमभक्तिरूपेण हविषा वयं विधेम सततं तस्यैवोपासनं कुर्वीमहि ॥ ५ ॥ ( द्यौःशान्तिः० ) हे सर्वशक्तिमन्परमेश्वर त्वदाज्ञया त्वत्कृपया च द्यौरन्तरिक्षं पृथिवी जलमोषधयो वनस्पतयो विश्वे देवाः सर्वे विद्वांसो ब्रह्मवेदः सर्वं जगच्चास्मदर्थं शान्तं निरुपद्रवं सुखका-

रकं सर्वदास्तु । अनुकूलं भवतु नः । येन वयं वेदभाष्यं सुखेन विदधीमहि । हे भगवन्नेतया सर्वशान्त्या विद्याबुद्धिविज्ञानारोग्य सर्वोत्तमसहायैर्भवान्मां सर्वथा वर्धयतु तथा सर्वं जगच्च ॥ ६ ॥ ( यतोय० ) हे परमेश्वर यतो यतो देशात्त्वं समीहसे जगद्रचनपालनार्थं चेष्टां करोषि ततस्ततो देशान्नो ऽस्मानभयं कुरु । यतः सर्वथा सर्वेभ्यो देशेभ्यो भयरहिता भवत्कृपया वयं भवेम ( शन्नः कु० ) तथा तत्रस्थाभ्यः प्रजाभ्यः पशुभ्यश्च नो ऽस्मानभयं कुरु । एवं सर्वेभ्यो देशेभ्यस्तत्रस्थाभ्यः प्रजाभ्यः पशुभ्यश्चनो ऽस्मान् शं कुरु धर्मार्थकाममोक्षादि सुखयुक्तान्स्वानुग्रहेण सद्यः संपादय ॥ ७ ॥ ( यस्मिन्नृ० ) हे भगवन् कृपानिधे यस्मिन्मनसि ऋचः सामानि यजूंषि च प्रतिष्ठितानि भवन्ति यस्मिन् यथार्थमोक्षविद्या च प्रतिष्ठिता भवति । ( यस्मिंश्चि० ) यस्मिंश्चि प्रजानां चित्तं स्मरणात्मकं सर्वमोतममस्ति सूत्रे मणिगणवत्प्रोतमस्ति । कस्यांकइव रथनाभौ अराइव तन्मे मम मनो भवत्कृपया शिवसंकल्पं कल्याणप्रियं सत्यार्थप्रकाशं चास्तु येन वेदानां सत्यार्थः प्रकाश्येत हे सर्वविद्यामय सर्वार्थविन्मदुपरिकृपां विधेहि यया निर्विघ्नेन वेदार्थभाष्यं सत्यार्थं पूर्णं वयं कुर्वीमहि । भवद्यशो वेदानां सत्यार्थं विस्तारयेमहि । यं दृष्ट्वा वयं सर्वे सर्वोत्कृष्टगुणाभवेम । ईदृशीं करुणामस्माकमुपरि करोतु भवान् । ए तदर्थं प्रार्थ्यते ऽनया प्रार्थनया ऽस्मान् शीघ्रमेवानुगृह्णातु । यत इदं सर्वोपकारकं कृत्यं सिद्धं भवेत् ॥

## Chapter IV.

### ॥ अथ पुनर्जन्मविषयः संक्षेपतः ॥

असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिहनोधेहि भोगम् । ज्योकपश्येम सूर्यमुच्चरन्तमनुमतेमृडयानः स्वस्ति ॥ १ ॥ पुनर्नो असुं पृथिवी ददातु पुनर्द्यौर्देवी पुनरन्त-

रिक्षम् । पुनर्नः सोमस्तन्वं ददातु पुनः पूषा पथ्यां३या स्वस्तिः ॥ २ ॥ ऋ० अ० ८ अ० १ व० २३ मं० ६ । ७ ॥

## ॥ भाष्याम् ॥

एतेषामभि० । एतदादिमंत्रेष्वत्र पूर्वजन्मानि पुनर्जन्मानि च प्रकाश्यन्तइति ( असुनीते० ) असवः प्राणा नीयन्ते येन सोऽसुनीतिस्तत्संबुद्धौ हे असुनीते ईश्वर मरणानन्तरं द्वितीयशरीरधारणे वयं सदा सुखिनो भवेम ( पुनरस्मा ) अर्थाद्यदा वयं पूर्वं शरीरं त्यक्त्वा द्वितीयशरीरधारणं कुर्मस्तदा ( चक्षुः ) चक्षुरित्युपलक्षणमिन्द्रियाणाम् ॥ पुनर्जन्मनि सर्वाणीन्द्रियाण्यस्मासु धेहि ( पुनः प्राणमि० ) प्राणमिति वायोरन्तःकरणस्योपलक्षणम् । पुनर्द्वितीयजन्मनि प्राणमन्तःकरणं च धेहि । एवं हे भगवन्पुनर्जन्मसु ( नः ) अस्माकं (भोगं) भोगपदार्थान् ( ज्योक् ) निरन्तरमस्मासु धेहि । यतो वयं सर्वेषु जन्मसु ( उच्चरन्तं ) सूर्य्यं श्वासप्रश्वासात्मकं प्राणं प्रकाशमयं सूर्य्यलोकं च निरन्तरं पश्येम ( अनुमते ) हे अनुमन्तः परमेश्वर ( नः ) अस्मान्सर्वेषु जन्मसु (मृडय) सुखय भवत्कृपया पुनर्जन्मसु ( स्वस्ति ) सुखमेव भवेदिति प्रार्थ्यते ॥ १ ॥ ( पुनर्नो ) हे भगवन् भवदनुग्रहेण ( नः ) अस्मभ्यं (असुं) प्राणमन्नमयं बलं च ( पृथिवी पुनर्ददातु ) तथा ( पुनर्द्यौ० ) पुनर्जन्मनि द्यौर्देवी-द्योतमाना सूर्य्यज्योतिरसुं ददातु ( पुनरन्तरिक्षं ) तथाऽन्तरिक्षं पुनर्जन्मन्यसुं जीवनं ददातु ( पुनर्नः सोमस्त० ) तथा सोमओषधिसमूहजन्योरसः पुनर्जन्मनि तन्वं शरीरं ददातु ( पुनः पूषा० ) हे परमेश्वर पुष्टिकर्त्ता भवान् ( पथ्यां ) पुनर्जन्मनि धर्ममार्गं ददातु तथा सर्वेषु जन्मसु ( यास्वस्ति ) सा भवत्कृपया नो अस्मभ्यं सदैव भवत्विति प्रार्थ्यते भवान् ॥ १ ॥

पुनर्मनः पुनरायुर्म आगन्पुनः प्राणः पुनरात्मा म आगन्पुनश्चक्षुः पुनः श्रोत्रं म आगन् वैश्वानरो अदब्धस्तनू

पा अग्निर्नः पातु दुरितादवद्यात् ॥ ३ ॥ यजु० अ० ४ मं० १५ ॥ पुनर्मैत्विन्द्रियं पुनरात्मा द्रविणं ब्राह्मणंच पुनरग्नयो धिष्ण्या यथास्थाम कल्पन्तामिहैव ॥ ४ ॥ अथर्व० कां० ७ अनु० ६ व० ६७ मं० १ ॥ आयो धर्माणि प्रथमः ससाद ततो वपूंषि कृणुषेपुरूणि । धास्युर्योनिं प्रथम आविवेशायो वाचमनुदिता चिकेत ॥ ५ ॥ अथर्व० कां० ५ अनु० १ व० १ मं० २ ॥

## ॥ भाष्यम् ॥

( पुनर्मनःपु० ) हे जगदीश्वर भवदनुग्रहेण विद्यादिश्रेष्ठगुणयुक्तं मन आयुश्च ( मे ) मह्यमागत्पुनः पुनर्जन्मसु प्राप्नुयात् ( पुनरात्मा पुनर्जन्मनि मदात्मा विचारः शुद्धः सन्प्राप्नुयात् ( पुनश्चक्षुः ) चक्षुःश्रोत्रं च मह्यं प्राप्नुयात् ( वैश्वानरः ) यः सकलस्य जगतो नयनकर्ता (अदब्धः) दम्भादिदोषरहितः ( तनूपा ) शरीरादिरक्षकः ( अग्निः ) विज्ञानानन्दस्वरूपः परमेश्वरः (पातुदुरि०) जन्मजन्मान्तरे दुष्टकर्मभ्योस्मान् पृथक्कृत्य पातु रक्षतु येन वयं निष्पापा भूत्वा सर्वेषु जन्मसु सुखिनो भवेम ॥ ३ ( पुनर्म० ) हे भगवन्पुनर्जन्मनोन्द्रियाणां मर्थात्सर्वाणीन्द्रियाण्यात्मप्राणधारको बलाख्यः ( द्रविणं ) विद्यादिश्रेष्ठधनं ( ब्राह्मणं च ब्रह्मनिष्ठत्वं ( पुनरग्नयः ) मनुष्यशरीरं धारयित्वा ऽऽहवनीयाद्यग्न्याधानकरणं ( मैतु ) पुनः पुनर्जन्मस्वेतानि मामाप्नुवन्तु ( धिष्ण्याऽयथास्थाम ) हे जगदीश्वर वयं यथा येन प्रकारेण पूर्वेषु जन्मसु धिष्ण्यधारणकाख्ययाधिया सोत्तमशरीरेन्द्रिया आस्थाम तथैवेहास्मिन्संसारे

पुनर्जन्मनिबुध्या सह स्वस्वकार्य्यकरणे समर्था भवेम येन वयं केनापि कारणेन न कदाचिद्विकला भवेम ॥ ४ ॥ ( आयोध० यो जीवः ( प्रथमः ) पूर्वजन्मनि ( धर्म्माणि ) यादृशानि धर्मकार्य्याणि ( आससाद ) कृतवानस्ति स ( ततो वपूंषि० ) तस्माद्धर्मकरणाद्बहून्युत्तमानिशरीराणि पुनर्जन्मनि कृणुषे धारयति । एवं यश्चाधर्मकृतयानि चकार स नैव पुनः पुनर्मनुष्यशरीराणि प्राप्नोति किं तु पश्चादीनिहि शरीराणि धारयित्वा दुःखानि भुंक्ते ॥ इदमेव मन्त्राधनेश्वरो ज्ञापयति ( धास्युर्योनिं० ) धास्यतीति धास्युरर्थात् पूर्वजन्मकृतपापपुण्य फलभोगशीलोजीवात्मा ( प्रथमः ) पूर्वं देहं त्यक्त्वा वायुजलौषध्यादि पदार्थान् ( आविवेश ) प्रविश्य पुनः कृतपापपुण्यानुसारिणीं योनिमाविवेश प्रविशतीत्यर्थः । ( यो वाचम० ) यो जीवोऽनुदितामीश्वरोक्तां वेदवाणीं आसमंताद् विदित्वा धर्ममाचरति स पूर्वविद्वच्छरीरं धृत्वा सुखमेव भुंक्ते । तद्विपरीता चरणस्तिर्य्यग्देहं धृत्वा दुःखभागी भवतीति विज्ञेयम् ॥ ५ ॥

द्वे सृवी अशृणवं पितॄणामहं देवानामुत मर्त्यानाम्
ताभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरं च ॥
॥ ६ ॥ य० अ० १९ मं ४७ ॥ मृतश्चाहं पुनर्जातो जातश्चाहं पुनर्मृतः । नानायोनि सहस्राणि मयोषितानि यानिवै ॥ १ ॥ आहारा विविधा भुक्ताः पीता नानाविधास्तनाः । मातरो विविधा दृष्टाः पितरः सुहृदस्तथा ॥ २ ॥ अवाङ्मुखं पीड्यमानो जन्तुश्चैव समन्वितिः ॥ निरु० अ० ११ खं० १९ ॥

॥ भाष्यम् ॥

( द्वे सृती० ) अस्मिन्संसारे पापपुण्यफलभोगाय द्वौमार्गौस्तः एकः पितॄणां ज्ञानिनां देवानां विदुषां च द्वितीयः च द्वितीयः ( मर्त्यानां ) विद्याविज्ञानरहितानां मनुष्याणाम् । तयोरेकः पितृयानोद्वितीयोदेवयानश्चेति यत्र जीवोमातापितृभ्यां देहं धृत्वा पापपुण्यफले सुखदुःखे पुनःपुनर्भुंक्ते । अर्थात् पूर्वापरजन्मानि च धारयति सा पितृयानाख्यासृतिरस्ति तथा यत्र मोक्षाख्यंपदं लब्ध्वा जन्ममरणाख्यात्संसाराद्विमुच्यते सा द्वितीया सृतिर्भवति । तत्र प्रथमायां सृतौ पुण्यसंचयफलं भुक्त्वा पुनर्जायते म्रियते च । द्वितीयायां च सृतौ पुनर्न जायते न म्रियते चेत्यहमेवंभूते द्वे सृती ( अशृणवं ) श्रुतवानस्मि । ( ताभ्यामिदं विश्व० ) पूर्वोक्ताभ्यां सर्वं जगत् ( एजत्समेति० ) कम्पमानं गमनागमने समेति सम्यक् प्राप्नोति ( यदन्तरा पितरं मातरं च यदा जीवः पूर्वं शरीरं त्यक्त्वा वायुजलौषध्यादिषु भ्रमित्वा पितृशरीरं मातृशरीरं वा प्रविश्य पुनर्जन्म प्राप्नोति तदा ससशरीरो जीवो भवतीति विज्ञेयम् ॥ ६ ॥ अत्र सृतश्चाहं पुनर्जातइत्यादिनिरुक्तकारैरपि पुनर्जन्मधारणमिति बोध्यम् ॥ ७ ॥

**स्वरसवाही विदुषोऽपि तथा ऽभिरूढोऽभिनिवेशः ॥ ८ ॥ पातं० अ० १ पा० २ सू० ९ ॥ पुनरुत्पत्तिः प्रेत्यभावः ॥ ९ ॥ न्या० अ० १ आ० १ सू० १९ ॥**

( स्वरस० ) योगशास्त्रे पतञ्जलिमहामुनिना तदुपरि भाष्यकर्त्रा वेदव्यासेन च पुनर्जन्म सद्भावः प्रतिपादितः । या सर्वेषु प्राणिषु जन्मारभ्यमरणत्रासाख्याप्रवृत्तिर्दृश्यते तया पूर्वापरजन्मानि भवन्तीति विज्ञायते । कुतः । जातमात्रकृमिरपि मरणत्रासमनुभवति । तथा विदुषोप्यनुभवो भवतीत्यतः । जीवेनानेकानिशरीराणि धार्य्यन्ते । यदि पूर्वजन्मनि

मरणानुभवो न भवेच्चेत्तर्हि तत्संस्कारोपि न स्यान्नैव संस्कारेणविना स्मृतिर्भवति स्मृत्याविना कथं जायेत। कुतः। प्राणिमात्रस्य मरणभय दर्शनात्पूर्वापरजन्मानि भवन्तीति वेदितव्यम्॥ ८॥ (पुनरु०) तथा महाविदुषा गोत्तमेनर्षिणा न्यायदर्शने तद्भाष्यकर्त्रा वात्स्यायनेनापि पुनर्जन्मभावोमतः यत्पूर्वशरीरं त्यक्त्वा पुनर्द्वितीयशरीरधारणं भवति तत्प्रेत्यभावाख्यःपदार्थो भवतीति विज्ञेयम्। प्रेत्यार्थान्मरणं प्राप्यभावो ऽर्थात्पुनर्जन्मधृत्वा जीवो देहवान् भवतीत्यर्थः॥ ६॥

अत्र केचिदेकजन्मवादिनो वदन्ति यदि पूर्वजन्मासीत्तर्हि तत्स्मरणं कुतो न भवतीत्यत्र ब्रूमः। भो ज्ञाननेत्रमुद्घाट्य द्रष्टव्यमस्मिन्नेव शरीरे जन्मतः पंचवर्षपर्य्यन्तं यद्यत्सुखं दुःखं च भवति यच्च जागरितावस्थास्थानां सर्वव्यवहाराणां सुषुप्त्यवस्थायांच॥ तदनुभूतस्मरणं न भवति पूर्वजन्मवृत्तस्मरणस्य तु का कथा (प्रश्नः) यदि पूर्वजन्मकृतयोः पापपुण्ययोः सुखदुःखफलेहीश्वरो ऽस्मिन् जन्मनि ददाति तयोश्चास्माकं साक्षाराभावात्सो ऽन्यायकारी भवति नातो ऽस्माकं शुद्धिर्भवति। अत्र ब्रूमः द्विविधं ज्ञानं भवत्येकं प्रत्यक्षं द्वितीयमानुमानिकं च। यथाकस्यचिद्वैद्यस्य च शरीरे ज्वरावेशो भवेत्तत्र खलु वैद्यस्तु विद्यया कार्य्यकारणसंत्यनुमानतो ज्वरनिदानं जानाति नापरश्च परन्तु वैद्यकविद्यारहितस्यापि ज्वरस्य प्रत्यक्षत्वात् किमपि मया कुपथ्यं पूर्वं कृतमिति जानाति विनाकारणेन कार्य्यं नैव भवतीति दर्शनात्। तथैव न्यायकारीश्वरोपि विना पापपुण्याभ्यां न कस्मैचित्सुखं दुःखं च दातुं शक्नोति संसारे नोचेत्सुखिदुःखिदर्शनाद् विज्ञायते पूर्वजन्मकृते पापपुण्ये बभूवतुरिति। अत्रैकजन्मवादिनामन्ये ऽपो दृशाः प्रश्नाः सन्ति तेषां विचारेणोत्तराणि देयानि किंचनबुद्धिमतः प्रत्यखिललेखनं योग्यं भवति तेष्वृद्देश्यमात्रेणाधिकं जानन्ति ग्रन्थोपि भूयान्न भवेदिति मत्वा ऽत्राधिकं नोलिख्यते॥

## Chapter V,

## ॥ अथ वर्णाश्रमविषयः संक्षेपतः ॥

तत्र वर्णविषयो मन्त्रो ब्राह्मणोऽस्य मुखमासीदित्युक्तस्तदर्थस्य तस्यायं शेषः ॥ वर्णो वृणोतेः ॥ १ ॥ नि० अ० २ खं० ३ । ब्रह्महि ब्राह्मणः । क्षत्रꣳहीन्द्रः क्षत्रꣳ राजन्यः ॥ २ ॥ श० कां० ५ अ० १ ॥ ब्रा० १ ॥ बाहू वै मित्रावरुणौ पुरुषो गर्त्तः ॥ वीर्य्यं वा एतद्राजन्यस्यय-द्बाहूवीर्य्यं वा एतदपाꣳरसः ॥ श० कां ५ । अ० ४ । ब्रा० ३ ॥ इषवो वै दिद्यवः ॥ ३ ॥ श० कां० ५ अ० ४ ब्र० ४ ॥

## ॥ भाष्यम् ॥

वर्णोतेति निरुक्तप्रामाण्यादवर्णीया वरीतुमर्हा गुणकर्माणि च दृष्ट्वा यथायोग्यं व्रियन्ते येते वर्णाः ॥ १ ॥ (ब्रह्म हि ब्राह्मणः) ब्रह्मणा वेदेन परमेश्वरस्योपासनेन च सह वर्त्तमानो विद्याद्युत्तमगुणयुक्तः पुरुषो ब्राह्मणो भवितुमर्हति । तथैव क्ष(त्रꣳहीन्द्रः०) क्षत्रं क्षत्रियकुलम् । यः पुरुष-इन्द्रः परमैश्वर्यवान् शत्रूणां क्षयकरणाद्युद्धोत्सुकत्वाच्च प्रजापालनतत्परः ( राजन्यः ) क्षत्रियो भवितुमर्हति ॥ २ ॥ ( मित्रः ) सर्वेभ्यः सुखदाता ( वरुणः ) उत्तमगुणकर्मधारणेन श्रेष्ठः । इमावेव क्षत्रियस्य द्वौ बाहुवद् भवेताम् ( वा ) अथवा वीर्य्यं पराक्रमो बलं चैतदुभयं राजन्यस्य क्षत्रियस्य बाहू भवतः अपां प्राणानां यो रस आनन्दस्तं प्रजाभ्यः प्रयच्छतः क्षत्रियस्य वीर्य्यं वर्धते तस्य ( इषवः ) बाणाः शस्त्रास्त्राणामुपलक्षणमेतत् । ( दिद्यवः ) प्रकाशकाः सदा भवेयुः ॥ ३ ॥

आश्रमा अपि चत्वारः सन्ति । ब्रह्मचर्य्य गृहस्थ वानप्रस्थ सन्यासभेदात् । ब्रह्मचर्य्येण सद्विद्या शिक्षा च ग्राह्या । गृहाश्रमेणोत्तमा-

चरणानां श्रेष्ठानां पदार्थानां चोन्नतिः कार्य्या । वानप्रस्थे नैकांतसेवनं ब्रह्मोपासनं विद्याफलविचारणादि च कार्य्यम् । संन्यासेन परब्रह्ममोक्ष-परमानन्दप्रापणं क्रियते सदुपदेशेन सर्वस्मा आनन्ददानं चेत्यादि चतुर्भिराश्रमैर्धर्मार्थकाममोक्षाणां सम्यक् सिद्धिः संपादनीया । एतेषां मुख्यतया ब्रह्मचर्य्येण सद्विद्यासुशिक्षादयः शुभगुणाः सम्यग्ग्राह्याः ॥ अत्र ब्रह्मचर्य्याश्रमे प्रमाणम् ॥

आचार्य्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः । तं रात्रीस्तिस्र उदरे बिभर्त्ति तं जातं द्रष्टुमभिसंयन्ति देवाः ॥ १ ॥ इयं समित्पृथिवी द्यौर्द्वितीयोतान्तरिक्षं समिधा पृणाति ॥ ब्रह्मचारी समिधा मेखलया श्रमेण लोकांस्तपसा पिपर्त्ति ॥ २ ॥ पूर्वो जातो ब्रह्मणो ब्रह्मचारी धर्मं वसानस्तपसोदतिष्ठत् ॥ तस्माज्जातं ब्राह्मणं ब्रह्मज्येष्ठं देवाश्च सर्वे अमृतेन साकम् ॥ ३ ॥ अथर्व० कां० ११ अनु० ३ व० ५ मं० । ३ । ४ । ५ ॥

॥ भाष्यम् ॥

( आचार्य्य उ० ) आचार्य्यो विद्याध्यापको ब्रह्मचारिणमुपनयमानो विद्यापठनार्थमुपवीतं दृढ़व्रतमुपदिशन्नन्तर्गर्भमिव कृणुते करोति । तं तिस्रो रात्रीस्त्रिदिनपर्य्यन्तमुदरे बिभर्त्ति । अर्थात् सर्वां शिक्षां करोति पठनस्याचरीतिमुपदिशति । यदा विद्यायुक्तो विद्वान् जायते

तदा तं विद्यासु जातं प्रादुर्भूतं देवा विद्वांसो द्रष्टुमभिसंयन्ति प्रसन्नताय तस्य मान्यं कुर्वन्ति। अस्माकं मध्ये महाभाग्योदयेनेश्वरानुग्रहेण च सर्वमनुष्योपकारार्थं त्वं विद्वान् जातइति प्रशंसन्ति (इयंसमित्) ॥ १ ॥ (इयं पृथिवी द्यौः प्रकाशोन्तरिक्षं चानया समिधा स ब्रह्मचारी पृणाति तत्रस्थान्सर्वान्प्राणिनो विद्यया होमेन च प्रसन्नान् करोति (समिधा) अग्निहोत्रादिना मेखलया ब्रह्मचर्य्यचिन्हधारणेन च (श्रमेण) परिश्रमेण (तपसा) धर्मानुष्ठानेनाध्यापनेनोपदेशेन च (लोकां०) सर्वान्प्राणिनः पिपर्त्ति पुष्टान्प्रसन्नान्करोति ॥ २ ॥ (पूर्वो जातो ब्रह्म) ब्रह्मणि वेदे चरितुं शीलं यस्य स ब्रह्मचारी (घर्मं वसानः) अत्यन्तं तपश्चरन्। ब्राह्मणोऽर्थाद्वेदं परमेश्वरं च विदद् पूर्वः सर्वेषामाश्रमाणामादिमः सर्वाश्रमभूषकः (तपसा) धर्मानुष्ठानेन (उदतिष्ठत्) ऊर्ध्वे उत्कृष्टबोधे व्यवहारे च तिष्ठति तस्मात्कारणात् (ब्रह्म ज्येष्ठं) ब्रह्मैव परमेश्वरोविद्या वा ज्येष्ठा सर्वोत्कृष्टा यस्य तं ब्रह्म ज्येष्ठम्। अमृतेन परमेश्वरमोक्षबोधेन परमानन्देन साकं सहवर्त्तमानं (ब्राह्मण)। ब्रह्मविदं (जातं) प्रसिद्धं (देवाः) सर्वे विद्वांसः प्रशंसन्ति ॥ ३ ॥

ब्रह्मचार्य्येति समिधा समिद्धः कार्ष्णं वसानो दीक्षितो दीर्घश्मश्रुः। स सद्य एति पूर्वस्मादुत्तरं समुद्रं लोकान्त्संगृभ्य मुहुराचरिक्रत् ॥ ४ ॥ ब्रह्मचारी जनयन् ब्रह्मापो लोकं प्रजापतिं परमेष्ठिनं विराजम्। गर्भो भूत्वा मृतस्य योनाविन्द्रो ह भूत्वा ऽसुरांस्ततर्ह ॥ ५ ॥ ब्रह्मचर्य्येण तपसा राजा राष्ट्रं विरक्षति। आचार्य्यो ब्रह्म-

चर्य्येण ब्रह्मचारिणमिच्छते ॥ ६ ॥ ब्रह्मचर्य्येण कन्या३ युवानं विन्दते पतिम् । अनड्वान् ब्रह्मचर्य्येणाश्वो घासं जिगीषति ॥ ७ ॥ ब्रह्मचर्य्येण तपसा देवा मृत्युमुपाघ्नत । इन्द्रोह ब्रह्मचर्य्येण देवेभ्यः स्व१राभरत् ॥ ८ ॥ अथर्व० कां० ११ अनु० ३ मं० ६ । ७ । १७ । १८ । १९ ॥

## भाष्यम् ॥

( ब्रह्मचार्य्येति० ) स ब्रह्मचारी पूर्वोक्तया ( समिधा ) विद्यया ( समिद्धः ) प्रकाशितः ( कार्ष्णं ) मृगचर्मादिकं ( वसानः ) आच्छादयन् (दीर्घश्मश्रुः) दीर्घकालपर्य्यन्तं केशश्मश्रूणि धारितानि येन स (दीक्षितः ) प्राप्तदीक्षः ( एति ) परमानन्दं प्राप्नोति । तथा ( पूर्वस्मात् ) ब्रह्मचर्य्यानुष्ठानभूतात्समुद्रात् ( उत्तरं ) गृहाश्रमं समुद्रं ( सद्यएति ) शीघ्रं प्राप्नोति । एवं निवासयोग्यान्सर्वान् ( लोकान्सं० ) संगृह्य मुहुर्वारंवारं ( आचरिक्रत् ) धर्मोपदेशमेव करोति ॥ ४ ॥ ( ब्रह्मचारी० ) स ब्रह्मचारी ( ब्रह्म ) वेदविद्यां पठन् (अपः) प्राणान् ( लोकं ) दर्शनं ( परमेष्ठिनं ) प्रजापतिं (विराजं ) विविधप्रकाशकं परमेश्वरं (जनयन्) प्रकटयन् ( अमृतस्य ) मोक्षस्य ( योनौ ) विद्यायां ( गर्भो भूत्वा ) गर्भवन्नियमेन स्थित्वा यथावद्विद्यां गृहीत्वा ( इन्द्रोह भूत्वा ) सूर्य्यवत्प्रकाशकः सन् (असुरान्) दुष्टकर्मकारिणो मूर्खान्पाखण्डिनोजनान्दैत्यरक्षःस्वभावान् ( ततर्ह ) तिरस्करोति सर्वान्निवारयति यथेन्द्रः सूर्य्योऽसुरान्मेघान् रात्रिं च निवारयति तथैव ब्रह्मचारी सर्वशुभगुणप्रकाशको ऽशुभगुणनाशकश्च भवतीति ॥ ५ ॥ ( ब्रह्मचर्य्येण० ) तपसा ब्रह्मचर्य्येण कृतेन राजा राष्ट्रं विरक्षति विशिष्टतया प्रजा रक्षितं योग्यो

भवति। आचार्य्योऽपि कृतेन ब्रह्मचर्य्येणैव विद्यां प्राप्य ब्रह्मचारिणमिच्छति स्वीकुर्य्यान्नान्यथेति ॥ ६ ॥ अत्र प्रमाणम् आचार्य्यः कस्मादाचारं ग्राहयत्याचिनोत्यर्थानाचिनोतिबुद्धिमिति वा निरु॰ अ० १ खं० ४॥ (ब्रह्मचर्य्येण०)एवमेव कृतेन ब्रह्मचर्य्येणैव कन्या युवतिः सती युवानं स्वसदृशं पतिं विंदते नान्यथा न चातः पूर्वमसदृशं वा। अनड्वानित्युपलक्षणं वेगवतां पशूनां ते पशवो ऽश्वश्च घासं यथा तथा कृतेन ब्रह्मचर्य्येण स्वविरोधिनः पशून् जिगीषन्ति युद्धेन जेतुमिच्छन्ति। अतो मनुष्यैस्त्ववश्यं ब्रह्मचर्य्यं कर्त्तव्यमितयभिप्रायः ॥ ७ ॥ ( ब्रह्मचर्य्येण तपसा देवा० ) देवा विद्वांसो ब्रह्मचर्य्येण वेदाध्ययनेन ब्रह्मविज्ञानेन तपसा धर्मानुष्ठानेन च मृत्युं जन्ममृत्युप्रभवदुःखमुपाघ्नत नितरां घ्नन्ति नान्यथा । ब्रह्मचर्य्येण सुनियमेन ( हेतिकिलार्थे ) यथा इन्द्रः सूर्य्योदेवेभ्यइन्द्रियेभ्यः स्वःसुखं प्रकाशं चाभरद्धारयति । तथा विना ब्रह्मचर्य्येण कस्यापि नैव विद्यासुखं च यथावद्भवति। अतो ब्रह्मचर्य्यानुष्ठानपूर्वका एव गृहाश्रमादयस्त्रय आश्रमाः सुखमेधन्ते । अन्यथा मूलाभावे कुतः शाखाः किंतु मूले दृढे शाखापुष्पफलच्छायादयः सिद्धा भवन्त्येवेति ॥ ८ ॥

## ॥ अथ गृहाश्रमविषयः ॥

यद्ग्रामेयदरण्ये यत्सभायां यदिन्द्रिये। यदेनश्चकृमा वयमिदं तदव यजामहे स्वाहा ॥ ९ ॥ देहि मे ददामि ते निमे धेहि निते दधे। निहारं च हरासि मे निहारं निहराणि ते स्वाहा ॥ १० ॥ गृहामाबिभीतमावेपध्वमूर्जं बिभ्रत एमसि । ऊर्जं बिभ्रद्वः । सुमनाः

सुमेधागृहा नैमि मनसा मोदमानः ॥ ११ ॥ येषा
मध्येति प्रवसन्येषु सौमनसोबहुः । गृहानुपह्वयामहे
तेनो जानन्तु जानतः ॥ १२ ॥ उपहूता इह गावउप-
हूताअजावयः। अथो अन्नस्यकीलालउपहूतोगृहेषु नः॥
क्षेमायवःशान्त्यै प्रपद्ये शिवꣳ शग्मꣳशंयोः शंयोः ॥ १३ ॥
य० अ० ३ मं० ४५ । ५० । ४१ । ४२ । ४३ ॥

॥ भाष्यम् ॥

( एषामभि० ) एतेषु गृहाश्रमविधानं क्रियतइति । ( यद्ग्रामे० ) यद्ग्रामे गृहाश्रमे वसन्तो वयं पुण्यं विद्याप्रचारं सन्तानोत्पत्तिमत्युत्तम सामाजिकनियमं सर्वोपकारकं तथैवारण्ये वानप्रस्थाश्रमे ब्रह्मविचारं विद्याध्ययनं तपश्चरणं सभासंबन्धे यच्छ्रेष्ठं इन्द्रिये मानसव्यवहारे च यदुत्तमं कर्म च कुर्मस्तत्सर्वमीश्वरमोक्षप्राप्त्यर्थमस्तु । यच्च भ्रमेणैनः पापं च कृतं तत्सर्वमिदं पापमवयजामह आश्रमानुष्ठानेन नाशयामः ॥ ८ ॥ ( देहि मे० ) परमेश्वर आज्ञापयति हे जीव त्वमेवं वद मे मह्यं देहि मत्सुखार्थं विद्यां द्रव्यादिकं च त्वं देहि। अहमपि ते तुभ्यं ददामि मे मह्यं मदर्थं त्वमुत्तमस्वभावदानमुदारतां सुशीलतां च धेहि धारय। ते तुभ्यं त्वदर्थमहमप्येवं च दधे। तथैव धर्मव्यवहारं क्रयदानादानाख्यं च हरासि प्रयच्छ। तथैवाहमपि ते तुभ्यं त्वदर्थं निहराणि नित्यं प्रयच्छानि ददानि। स्वाहेति सत्यभाषणं सतत्मानं सतताचरणं सत्यवचनश्रवणं च सर्वेवयं मिलित्वा कुर्य्यामेति सततं नैव सर्वं व्यवहारं कुर्मः ॥ १० ॥ ( गृहा० ) हे गृहाश्रममिच्छन्तो मनुष्या स्वयंवरं विवाहं कृत्वा यूयं गृहाणि प्राप्नुत गृहाश्रमानुष्ठाने ( मा बिभीत ) भयं मा प्राप्नुत तथा ( मावेपध्वं ) माकंपध्वं ( ऊर्जं बिभ्रत

एमसि ) ऊर्जं बलं पराक्रमं च बिभ्रतः पदार्थानिमसि वयं प्राप्नुम इतोच्छत ( ऊर्जंबिभ्रद्वः ) वो युष्माकं मध्येह मूर्जं बिभ्रत्सन् (सुमनाः) शुद्धमनाः सुमेधोत्तमबुद्धियुक्तः ( मनसा मोदमानः ) प्राप्तानन्दः ( गृहानेमि ) गृहाणि प्राप्नोमि ॥ ॥ ११ ॥ ( येषामध्येति प्र० ) येषु गृहेषु प्रवसतो मनुष्यस्य ( बहुः ) अधिकः ( सौमनसः ) आनन्दो भवति । तत्र प्रवसन् येषां यान्पदार्थान्सुखकारकान्स (अध्येति) स्मरति ( गृहानुपह्वयामहे ) वयं गृहेषु विवाहादिषु सत्कारार्थं तान् गृहसंबंधिनः सखिबन्ध्वाचार्य्यादीन्निमंत्रयामहे । ( तेनः ) विवाहनियमेषु कृतप्रतिज्ञानस्मान् ( जानतः ) प्रौढ़ज्ञानान् युवावस्थास्थान्स्वेच्छया कृतविवाहान् ते ( जानन्तु ) अस्माकं साक्षिणः सन्त्विति ॥ १२ ॥ (उपहूता इह० ) हे परमेश्वर भवत्कृपया इहास्मिन् गृहाश्रमे ( गावः ) पशुपृथिवीन्द्रियविद्याप्रकाशाल्हादादयः ( उपहूताः ) अर्थात्सम्यक् प्राप्ता भवन्तु तथा (अजवः) उप कूवहूता अस्मदनुला भवन्तु ( अथो अन्नस्या की० ) अथो इति पूर्वोक्तपदार्थप्राप्त्यनन्तरं नोऽस्माकं गृहेष्वन्नस्य भोक्तव्यपदार्थसमूहस्य कीलालो विशेषेणोत्तमरस उपहूतः सम्यक् प्राप्तो भवतु ( क्षेमाय वः शान्त्यै० ) वो युष्मानत्र पुरुषव्यत्ययोस्ति तान्पूर्वोक्तान्प्रत्यक्षान्पदार्थान् ( क्षेमाय ) रक्षणाय ( शान्त्यै ) सुखाय प्रपद्ये प्राप्नोति तत्प्राप्त्या ( शिवं ) निश्श्रेयसंकल्याणं पारमार्थिकंसुखं (शर्मं ) सांसारिकमाभ्युदयिकंसुखं च प्राप्नुयाम् । शंयोः शमिति निघंटौ पदनामास्ति । परोपकाराय गृहाश्रमे स्थित्वा पूर्वोक्तस्य द्विविधस्य सुखस्योन्नतिं कुर्म्मः ॥ १३ ॥

## ॥ अथ वानप्रस्थविषयः संक्षेपतः ॥

त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचर्य्या चार्य्यकुलवासी तृतीयोऽत्यन्त मात्मानमाचार्य्यकुलेऽवसादयन्सर्व एते पुण्यलोका भवन्ति ॥ छान्दोग्य० प्र० २ खं० २३ ।

( त्रयो धर्म० ) अत्र सर्वेष्वाश्रमेषु धर्मस्य स्कन्धाः अवयवास्त्रय सन्ति। अध्ययनं यज्ञः क्रियाकाण्डं दानं च। तत्र प्रथमे ब्रह्मचारी तपः सुशिक्षा धर्मानुष्ठानेनाचार्य्यकुले वसति। द्वितीयो ऽत्यन्तमात्मानमसादयन् हृदये विचारयन्नेकांतदेशं प्राप्य सत्यासत्ये निश्चिनुयात्स वानप्रस्थाश्रमी॥ एते सर्वे ब्रह्मचर्य्यादयस्त्रय आश्रमाः पुण्यलोकाः सुखनिवासाः सुखयुक्ता भवन्ति पुण्यानुष्ठानादेवाश्रमसंख्या जायते॥ ब्रह्मचर्य्याश्रमेण गृहीतविद्यो धर्मेश्वरादिसम्यङ्निश्चित्य गृहाश्रमेण तदनुष्ठानं तद्विज्ञानवृद्धं च कृत्वा ततो वनमेकांतं गत्वा सम्यक् सत्यासत्यवस्तुव्यवहारान्निश्चित्य वानप्रस्थाश्रमं समाप्य संन्यासी भवेत्। अर्थाद् ब्रह्मचर्य्याश्रमं समाप्य गृही भवेत् गृहीभूत्वा वनीभवेद्वनीभूत्वा प्रव्रजेदित्येकः पक्षः। ( यदहरेव विरजेत तदहरेव प्राव्रजेद्वनाद्वा ) गृहाद्वा ( अस्मिन्पक्षे वानप्रस्थाश्रममकृत्वा गृहाश्रमानंतरं गृह्णीयादिति द्वितीयः पक्षः। ब्रह्मचर्य्यादेव प्रव्रजेत्सम्यग्ब्रह्मचर्य्याश्रमं कृत्वा गृहस्थवानप्रस्थाश्रमाम कृत्वा संन्यासाश्रमं गृह्णीयादिति तृतीयः पक्षः सर्वत्रान्याश्रमविकल्प उक्तः परन्तु ब्रह्मचर्य्याश्रममनुष्ठानं नित्यमेव कर्त्तव्यमित्यायाति। कुतः। ब्रह्मचर्य्याश्रमेणविना ऽन्याश्रमानुत्पत्तेः॥

ब्रह्मसꣳस्थोऽमृतत्वमेति। छान्दो० प्रपा० २ खं० २३॥ तमेतं वेदानुवचनेन विविदिषन्ति। ब्रह्मचर्य्येण तपसा श्रद्धया यज्ञेनानाशकेन चैतमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमीप्सन्तः प्रव्रजन्ति। एतद्ध स्मवैतत्पूर्वे ब्राह्मणाः। अनूचाना विद्वाꣳसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोकइति ते ह स्मपुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थानाथभिक्षाचर्य्यंचरन्ति याह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणोभेह्येते एषणे एव भवतः। श० कां० १४ अ० ७॥ ब्रा० २

## ॥ भाष्यम् ॥

( ब्रह्मसंस्थः० ) चतुर्थो ब्रह्मसंस्थः संन्यासी ( अमृतत्वं ) एति प्राप्नोति ( तमेतं वेदा० ) सर्व आश्रमिणो विशेषतः संन्यासिनस्तमेतं परमेश्वरं सर्वभूताधिपतिं वेदानुवचनेन तदध्ययनेन तच्छ्रवणेन तदुक्तानुष्ठानेन च वेत्तुमिच्छन्ति। (ब्रह्मचर्य्येण०) ब्रह्मचर्य्येण तपसा धर्मानुष्ठानेन श्रद्धयाऽत्यन्तप्रेम्णा यज्ञेन नाशरहितेन विज्ञानेन धर्मक्रियाकाण्डेन चैतं परमेश्वरं विदित्वैव मुनिर्भवति॥ प्रव्राजिनः संन्यासिन एनं यथोक्तं लोकं द्रष्टव्यं परमेश्वरमेवेप्सन्तः प्रव्रजन्ति संन्यासाश्रमं गृह्णन्ति ( एतद्ध स्म० ) ये एतदिच्छन्तः सन्तः पूर्वे अत्युत्तमा ब्राह्मणा ब्रह्मविदोऽनूचाना निश्शङ्काः पूर्णज्ञानिनोऽन्येषां शंकानिवारका विद्वांसः प्रजां गृहाश्रमं न कामयन्ते नेच्छन्ति वयं ( ते ह स्म० ) हेति स्फुटे स्मेति स्मये ते प्रोत्फुल्लाः प्रकाशमाना वदन्ति वयं प्रजया किं करिष्यामः किमपिनेत्यर्थः। येषां नोऽस्माकमयमात्मा परमेश्वरः प्राप्योलोको दर्शनीयश्चास्ति। एवं ते ( पुत्रैषणायाश्च ) पुत्रोत्पादनेच्छायाः ( वित्तैषणायाश्च ) जड़धनप्राप्त्यनुष्ठानेच्छायाः ( लोकैषणायाश्च ) लोके स्वस्य प्रतिष्ठास्तुतिनिन्देच्छायाश्च ( व्युत्थाय ) विरज्य ( भिक्षाचर्य्यं च० ) संन्यासाश्रमानुष्ठानं कुर्वन्ति। यस्य पुत्रैषणा पुत्रप्राप्त्येषणेच्छा भवति तस्यावश्यं वित्तैषणापि भवति यस्य वित्तैषणा तस्य निश्चयेन लोकैषणा भवतीति विज्ञायते। तथा यस्यैका लोकैषणा भवति तस्योभे पूर्वे पुत्रैषणालोकैषणे भवतः। यस्य च परमेश्वरमोक्षप्राप्त्येषणेच्छास्ति तस्यैतास्तिस्रोनिवर्त्तन्ते। नैवब्रह्मानन्दवित्तेन तुल्यं लोकवित्तं कदाचिद् भवितुमर्हति। यस्य परमेश्वरे प्रतिष्ठास्ति तस्यान्याः सर्वाः प्रतिष्ठा नैव उचिता भवन्ति। सर्वान्मनुष्याननुगृह्णन् सर्वदा सत्योपदेशेन सुखयति तस्य केवलं परोपकारमात्रं सत्यप्रवर्तनं प्रयोजनं भवतीति॥

प्राजापत्यामिष्टिं निरूप्य तस्यां सर्ववेदसं हुत्वा ब्राह्मणः प्रव्रजेदितिशतपथे श्रुत्यक्षराणि ॥ यं यं लोक

मनसा संविभाति विशुद्धसत्वः कामयते यांश्च कामान्। तं तं लोकं जायते तांश्च कामांस्तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः ॥ १ ॥ मुण्डकोपनि० मुण्डके ३ खं० १ मं० १०

भाष्यम् ॥

( प्राजापत्या० ) सच संन्यासी प्राजापत्यां परमेश्वरदेवता कामिष्टिं कृत्वा हृदये सर्वमेतन्निश्चित्य तस्यां ( सर्ववेदसं ) शिखासूत्रादिकं हुत्वा मुनिर्मननशील: सन्प्रव्रजति संन्यासं गृह्णाति । परं त्वयं पूर्णविद्यावतां रागद्वेषरहितानां सर्वमनुष्योपकारबुद्धीनां संन्यासग्रहणाधिकारो भवति नाल्पविद्यानामिति । तेषां संन्यासिनां प्राणापानहोमो दोषेभ्य इन्द्रियाणां मनसश्च सदा निवर्त्तनं सत्यधर्मानुष्ठानं चैवाग्निहोत्रम्। किंतु पूर्वेषां त्रयाणामेवाश्रमिणामनुष्ठातुं योग्यं यद्वा ह्यक्रियामयमस्ति संन्यासिनां तन्न । सत्योपदेश एव संन्यासिनां ब्रह्मयज्ञ: देवयज्ञो ब्रह्मोपासनम् । विज्ञानिनां प्रतिष्ठाकरणं पितृयज्ञ: । ह्यज्ञेभ्यो ज्ञानदानं सर्वेषां भूतानामुपर्य्यनुग्रहोऽपीडनं च भूतयज्ञ: । सर्वमनुष्योपकारार्थं भ्रमणमभिमानशून्यतासत्योपदेशकरणेन सर्वमनुष्याणां सत्कारानुष्ठानं वातिथियज्ञ: । एवं लक्षणा: पंचमहायज्ञा विज्ञानधर्मानुष्ठानमया भवन्तीति विज्ञेयम् । परं त्वेकस्याद्वितीयस्य सर्वशक्तिमदादिविशेषणयुक्तस्य परब्रह्मण उपासनासत्यधर्मानुष्ठानं च सर्वेषामाश्रमिणामेकमेव भवतीत्ययं विशेष: ॥ ( विशुद्ध० ) शुद्धान्त: करणो मनुष्य: ( यं यं लोकं मनसा ) ध्यानेन संविभाति इच्छति ( कामयते यांश्च कामान् ) यांश्च मनोरथानिच्छति तं तं लोकं तांश्च कामान् ( जायते ) प्राप्नोति तस्मात्कारणाद् ( भूति-काम: ) ऐश्वर्य्यकामो मनुष्य: ( आत्मज्ञं ) आत्मानं परमेश्वरं जानाति तं संन्यासिनमेव सर्वदार्चयेत्सत्कुर्य्यात् । तस्यैव संगेन सत्कारेण च मनुष्याणां सुखप्रदा लोका: कामाश्च सिद्धा भवन्तीति । तद्भिन्नान् मिथ्योपदेशकान् स्वार्थसाधनतत्परान्पाखंडिन: कोपि नैवार्चयेत् । कुत: । तेषां सत्कारस्य निष्फलत्वाद्दु:खफलत्वाच्चेति ॥

ब्रह्म च क्षत्रं च राष्ट्रं च विशश्च त्विषिश्च यशश्च वर्चश्च द्रविणं च ॥ १३ ॥ आयुश्च रूपं च नाम च कीर्त्तिश्च प्राणश्चापानश्च चक्षुश्च श्रोत्रं च ॥ १४ ॥ पयश्च रसश्चान्नं चान्नाद्यं च ऋतं च सत्यं चेष्टं च पूर्तं च प्रजा च पशवश्च ॥ १५ ॥ अथर्व० कां० १२ अनु० ५ मं० ८।९।१०।

## ॥ भाष्यम् ॥

इत्याद्यनेकमंत्रप्रमाणैर्धर्मोपदेशो वेदेष्वीश्वरेणैव सर्वमनुष्यार्थमुपदिष्टोऽस्ति ( ब्रह्म च ) ब्राह्मणोपलक्षणं सर्वोत्तमविद्यागुणकर्मवत्व सद्गुणप्रचारकरणत्वं च ब्राह्मणलक्षणं तच्च सदैव वर्धयितव्यम् (क्षत्रं च) क्षत्रियोपलक्षणं विद्याचातुर्य्यशौर्य्यधैर्य्यवीरपुरुषान्वितं च सदैवोन्नेयम् ( राष्ट्रं ) च सत्पुरुषसभयासुनियमैः सर्वसुखाढ्यं शुभगुणान्वितं च राज्यं सदैव कार्य्यम् ( विशश्च ) वैश्यादि प्रजानां व्यापारादिकारिणां भूगोले ह्यव्याहतगतिसंपादनेन व्यापाराद्धनवृद्ध्यर्थं संरक्षणं च कार्य्यम् ( त्विषिश्च ) दीप्तिः शुभगुणानां प्रकाशः सत्यगुणकामना च शुद्धा प्रचारणीयेति ( यशश्च ) धर्मान्वितानुत्तमा कीर्त्तिः संस्थापनीया ( वर्चश्च ) सद्विद्याप्रचारं सम्यगध्ययनाध्यापनप्रबन्धं कर्म सदा कार्य्यम् (द्रविणं च) अप्राप्तस्य पदार्थस्य न्यायेन प्राप्तीच्छा कार्य्या प्राप्तस्य संरक्षणं रक्षितस्य वृद्धिर्वृद्धस्य सत्कर्मसुव्ययश्च योजनीयः। एतच्चतुर्विधपुरुषार्थेन धनधान्योन्नति सुखे सदैव कार्य्ये ॥ १३ ॥ ( आयुश्च ) वीर्य्यादिरक्षणेन भोजनाच्छादनादिसुनियमेन ब्रह्मचर्य्यसुसेवनेनायुर्बलं कार्य्यम् ( रूपं च ) निरंतरविषयासेवनेन सदैव सौन्दर्य्यादिगुणयुक्तं स्वरूपं रक्षणीयम् ( नाम च ) सत्कर्मानुष्ठानेन नाम प्रसिद्धिः कार्य्या यतोऽन्यस्यापि सत्कर्मसूत्साहवृद्धिः स्यात् ( कीर्तिश्च ) सद्गुणग्रहणार्थमीश्वरगुणान्-

नुपदेशार्थं कीर्त्तनं स्वसत्कीर्त्तिमत्त्वं च सदैव कार्य्यम् ( प्राणश्चापा-नश्च ) प्राणायामरीत्या प्राणापानयोः शुद्धिबले कार्य्ये । शरीराद्बाह्यदेशं यो वायुर्गच्छति स प्राणः । बाह्यादेशाच्छरीरं प्रविशति स वायुरपानः गुदादेशनिवासादिनैनयोः प्रच्छर्दनविधारणाभ्यां बुद्धिशारीरबलं च संपादनीयम् ( चक्षुश्च श्रोत्रं च ) चाक्षुषं प्रत्यक्षं श्रोत्रं शब्दजन्य त्वाद-नुमानादीन्यपि प्रमाणानि यथावद्वेदितव्यानि तैः सत्यं विज्ञानं च सर्वथा कार्य्यम् ॥ १४ ॥ ( पयश्च रसश्च ) पयोजलादिकं रसो दुग्धघृता-दश्चैतौ वैद्यकरीत्या सम्यक् शोधयित्वा भोक्तव्यौ ( अन्नं चान्नाद्यं च ) अन्नमोदनादिकमन्नाद्यं भोक्तुमर्हं शुद्धं संस्कृतमन्नं संपाद्यैव भोक्तव्यम् ( ऋतं च सत्यं च ) ऋतं ब्रह्म सर्वदैवोपासनीयं सत्यं प्रत्यक्षादिभिः प्रमाणैः परीक्षितं यादृशं स्वात्मन्यस्ति तादृशं सदा सत्यमेव वक्तव्यम् । मन्तव्यं च । ( इष्टं च पूर्त्तं च ) इष्टं ब्रह्मोपासनं सर्वोपकारकं यज्ञा-नुष्ठानं च पूर्त्तं तु यत्पूर्त्यर्थं मनसा वाचा कर्मणा सम्यक् पुरुषार्थेनैव सर्ववस्तुसंभारैश्चोभयानुष्ठानपूर्त्तिः कार्य्येति ( प्रजा च पशवश्च ) प्रजा-सन्तानाकारादिराज्यं च सुशिक्षा विद्या सुखान्विता हस्त्यश्वादयः पशवश्च सम्यक् शिक्षान्विताः कार्य्याः । बहुभिश्चकारैरन्येपि शुभगुणा अत्र ग्राह्याः ॥ १५ ॥

## Chapter VI.

संगच्छध्वं संवदध्वं संवो मनांसि जानताम् ॥
देवाभागं यथा पूर्वे संजानाना उपासते ॥ १ ॥ ऋ० अ० ८ अ० ८ व० ४९ मं० २ ॥

( संगच्छध्वं० ) ईश्वरोभिवदति हे मनुष्या मयोक्तं न्याय्यं पक्षपा-तरहितं सत्यलक्षणोज्ज्वलं धर्मं यूयं संगच्छध्वं सम्यक् प्राप्नुत अर्थात् तत्प्राप्त्यर्थं सर्वं विरोधं विहाय परस्परं संगता भवत येन युष्माकमुत्तमं सुखं सर्वदा वर्धेत सर्वदुःखनाशश्च भवेत् ( संवद० ) संगताभूत्वा परस्परं

जल्पवितंडादि विरुद्धवादं विहाय संप्रीतया प्रश्नोत्तरविधानेन संवादं कुरुत यतो युष्मासु सम्यक्सत्यविद्याद्युत्तमगुणाः सदा वर्धेरन् ( संवो मनांसि जानताम् ) यूयं जानन्तो विज्ञानवन्तो भवत जानतां वो युष्माकं मनांसि यथा ज्ञानवन्ति भवेयुस्तथा सम्यक् पुरुषार्थं कुरुतार्थात्वेन युष्मन्मनांसि सदानन्दयुक्तानि स्युस्तया प्रयतध्वम्। युष्माभिर्धर्म एव सेवनीयो नाधर्मश्चेत्यत्र दृष्टान्त उच्यते ( देवाभागं यथा० ) यथा पूर्वं संजानाना ये सम्यग्ज्ञानवन्तो देवा विद्वांस आप्ताः पक्षपातरहिता ईश्वरधर्मोपदेशप्रियाश्चासन् युष्मत्पूर्वं विद्यामधीत्य वर्त्तन्ते किंवा ये मृतास्ते यथा भागं भजनीयं सर्वशक्तिमदादिलक्षणमीश्वरं मदुक्तं धर्मं चोपासते। तथैव युष्माभिरपि स एव धर्म उपासनीयो यतो वेदप्रतिपाद्योधर्मो निश्शङ्कतया विदितश्च भवेत् ॥ १ ॥

समानोमन्त्र समितिः समानी समानं मनः सहचित्तमेषाम् ॥ समानं मन्त्रमभिमन्त्रयेवः समानेनवो हविषा जुहोमि ॥ २ ॥ ऋ० अ० ८ अ० ८ व० ४९ । मं० ३

॥ भाष्यम् ॥

( समानोमन्त्रः० ) हे मानवा वो युष्माकं मंत्रोऽर्थान्मामीश्वरमारभ्य पृथिवीपर्यन्तानां गुप्तप्रसिद्धसामर्थ्यगुणानां पदार्थानां भाषणमुपदेशनं ज्ञानं वा भवति यस्मिन् येन वा समंतो विचारो भवितुमर्हति। यद्यथा। राज्ञो मंत्री सत्यासत्यविवेककर्तेत्यर्थः सोपि सत्यज्ञानफलः सर्वोपकारकः समानस्तुल्यो ऽर्थाद्विरोधरहितएव भवतु। यदा बहुभिर्मनुष्यैर्मिलित्वा संदिग्धपदार्थानां विचारः कर्त्तव्यो भवेत्तदा प्रथमतः पृथक् पृथगपि सभासदां मतानि भवेयुस्तत्रापि सर्वेभ्यः सारं गृहीत्वा यद्यत्सर्वमनुष्यहितकारकं सद्गुणलक्षणान्वितं मतं स्यात्तत्सर्वं ज्ञात्वैकत्र कृत्वा नित्यं समाचरत। यतः प्रतिदिनं सर्वेषां मनुष्याणामुत्तरोत्तर

मुत्तमं सुखं वर्धत। तथा ( समितिः समानी ) समितिः सामाजिकनियमव्यवस्थार्थाद्यान्यायप्रचाराद्या सर्वमनुष्याणां मान्यज्ञानप्रदा ब्रह्मचर्यविद्याभ्यासशुभगुणसाधिका शिष्टसभाया राज्यप्रबंधाद्याल्हादिता परमार्थव्यवहारसाधिका बुद्धिशरीरबलारोग्यवर्धिनी शुभमर्यादापि समानी सर्वमनुष्यस्वतंत्रदानसुखवर्धनायैकरसैव कार्य्येति ( समानं मनः० ) मनः संकल्पविकल्पात्मकं संकल्पोभिलाषेच्छेत्यादि विकल्पो ऽप्रीतिर्द्वेषइत्यादि शुभगुणान्प्रति संकल्पः अशुभगुणान्प्रति विकल्पश्च रक्षणीयः। एतद्धर्मकं युष्माकं मनः समानमन्योन्यमविरुद्धस्वभावमेवास्तु। यच्चित्तं पूर्वपरानुभूतं स्मरणात्मकं धर्मेश्वरचिन्तनं तदपि समानमर्थात्सर्वप्राणिनां दुःखनाशाय सुखवर्धनाय च स्वात्मवत्सम्यक् पुरुषाऽर्थेनैव कार्य्यम् ( सह ) युष्माभिः परस्परस्य सुखोपकारायैव सर्वं सामर्थ्यं योजनीयम्। ( एषां० ) येह्येषां सर्वजीवानां संगि स्वात्मवद्वर्त्तन्ते तादृशानां परोपकारिणां परमसुखदातॄणामुपर्य्यहं कृपालुर्भूत्वा ( अभिमन्त्रये वः ) युष्मान्पूर्वपरोक्तं धर्ममाज्ञापयामि। इत्थमेव सर्वैः कर्त्तव्यमिति येन युष्माकं मध्ये नैव कदाचित्सत्यनाशो ऽसत्यवृद्धिश्च भवेत्। (समानेन वो०) हविर्दानं ग्रहणं च तदपि सत्येन धर्मेण युक्तमेव कार्य्यम्। तेन समानेनैव हविषा वो युष्मान् जुहोमि सत्यधर्मेण सहैवाहं सदा नियोजयामि। अतो मदुक्त एव धर्मो मन्तव्यो नान्य इति॥ २॥

**समानीव आकूतिः समाना हृदयानि वः॥ समानमस्तु वोमनो यथा वः सुसहासति॥ ऋ० अ० ८ अ० ८ व० ४९ मं ४॥**

## ॥ भाष्यम्॥

अस्यायमभिप्रायः। हे मानवावो युष्माकं यत्सर्वं सामर्थ्यमस्ति तद्धर्मसंबन्धे परस्परमविरुद्धं कृत्वा सर्वैः सुखं सदा संवर्धनीयमिति। ( समानीव० ) आकूतिरध्यवसाय उत्साह आप्तरीतिर्वा सापि वो युष्माकं

परस्परोपकारकरणेन सर्वेषां जनानां सुखायैव भवतु । यथा मदुपदिष्टस्यास्य धर्मस्य विलोपो न स्यात्तथैव कार्य्यम् ( समानाहृदयानि वः ) वो युष्माकं हृदयान्यर्थान्मानसानि प्रेमप्रचुराणि कर्माणि निर्वैराय समानान्यविरुद्धान्येव सन्तु ( समानमस्तु वो मनः ) अत्र प्रमाणम् कामसंकल्पो विचिकित्सा श्रद्धा अश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव तस्मादपि पृष्ठत उपस्पृष्टो मनसा विजानाति । श० कां० १४ अ० ४ मनसा विविच्य पुनरनुष्ठातव्यम् । शुभगुणानामिच्छाकामः । तत्प्राप्त्यनुष्ठानेच्छा संकल्पः । पूर्वं संशयं कृत्वा पुनर्निश्चयकरणेच्छासंशयो विचिकित्सा । ईश्वर सत्यधर्मादिगुणानामुपर्य्यत्यन्तं विश्वासः श्रद्धा । अनीश्वरवादाधर्माद्युपरिसर्वथाह्यनिश्चयोऽश्रद्धा । सुखदुःखप्राप्त्यापीश्वरधर्माद्युपरि सदैव निश्चयरक्षणं धृतिः । अशुभगुणानामाचरणं नैव कार्य्यमित्यधैर्य्यमधृतिः । सत्यधर्मानाचरणे ऽसत्याचरणे च मनसः संकोचो घृणा ह्रीः । शुभगुणान् शीघ्रं धारयेदिति धारणावती वृत्तिर्धीः । असत्याचरणादीश्वराज्ञाभंगात्पापाचरणादीश्वरो नः सर्वत्र पश्यतीत्यादि वृत्तिर्भीः एतद्धर्मकं मनो वो युष्माकं समानं तुल्यमस्तु । ( यथावः सुसहासति ) हे मनुष्या वो युष्माकं यथा परस्परं सुसहायेन स्वसति सम्यक् सुखोन्नतिः स्यात्तथा सर्वैः प्रयत्नो विधेयः । सर्वान् सुखिनो दृष्ट्वा चित्त आल्हादः कार्य्यः ॥ नैव कंचिदपि दुःखितं दृष्ट्वा सुखं केनापि कर्त्तव्यम् । किंतु यथा सर्वे स्वतंत्राः सुखिनः स्युस्तथैव सर्वैः कार्य्यमिति ॥

**दृष्ट्वा रूपे व्याकरोत्सत्यानृते प्रजापतिः । अश्रद्धामनृते दधाच्छ्रद्धाᳬं सत्ये प्रजापतिः ॥ ४ ॥** य० अ० १९ मं० ७७ ।

## ॥ भाष्यम् ॥

अस्यायम० ( दृष्ट्वा० ) प्रजापतिः परमेश्वरो धर्ममुपदिशति सर्वैर्मनुष्यैः सर्वथा सर्वदा सत्यएव सम्यक् श्रद्धा रक्षणीया ऽसत्ये चाश्रद्धेति।

(प्रजापतिः) परमेश्वरः (सत्यानृते) धर्माधर्मौ (रूपे) प्रसिद्धा प्रसिद्धलक्षणौ दृष्ट्वा (व्याकरोत्) सर्वज्ञा स्वया विद्यया विभक्तौ कृतवानस्ति। कथमित्यत्राह (अश्रद्धाम०) सर्वेषां मनुष्याणामनृते ऽसत्ये ऽधर्मे ऽन्याये ऽश्रद्धामदधात्। अर्थादधर्मे ऽश्रद्धां कर्तुमाज्ञापयति। तथैव वेदशास्त्रप्रतिपादिते सत्ये प्रत्यक्षादिभिः प्रमाणैः परीक्षिते पक्षपातरहिते न्याय्ये धर्मे प्रजापतिः सर्वज्ञ ईश्वरः श्रद्धां चादधात् एवं सर्वैर्मनुष्यैः परमप्रयत्नेन स्वकीयंचित्तं धर्मे प्रवृत्तमधर्मान्निवृत्तं च सदैव कार्य्यमिति॥ ४॥

**दृते दृᳫह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्॥ मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे। मित्रस्य चक्षुषा समीक्षामहे॥ ५॥ य० अ० ३६ मं० १८॥**

## ॥ भाष्यम्॥

(दृते दृᳫह०) अस्यायम० सर्वे मनुष्याः सर्वथा सर्वदा सर्वैः सह सौहार्द्देनैव वर्तेरन्निति। सर्वैरीश्वरोक्तोयंधर्मः स्वीकार्य्य ईश्वरः प्रार्थनीयश्च यतो धर्मनिष्ठा स्यात्। तद्यथा हे दृते सर्वदुःखविनाशकेश्वर मदुपरि कृपां विधेहि यतो ऽहं सत्यधर्मं यथावद्विजानीयाम् पक्षपातरहितस्य सुहृदश्चक्षुषा प्रेमभावेन सर्वाणि भूतानि (मा) मां सदा समीक्षन्तामर्थान्मम मित्राणि भवन्तु। इतीच्छाविशिष्टं मां (दृᳫह) दृᳫंह सत्यसुखैः शुभगुणैश्च सह सदा वर्धय (मित्रस्याहं०) एवमहमपि मित्रस्य चक्षुषा स्वात्मवत्प्रेमबुद्ध्या (सर्वाणि भूतानि समीक्षे) सम्यक् पश्यामि (मित्रस्य च०) इत्यमेव मित्रस्य चक्षुषा निर्वैरा भूत्वा वयमन्योन्यं समीक्षामहे सुखसंपादनार्थं सदा वर्त्तामहे। इतीश्वरोपदिष्टः धर्मो हि सर्वैर्मनुष्यैरेकएव मन्तव्यः॥ ५॥

अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम्। इदमहमनृतात्सत्यमुपैमि॥ ६॥ य० अ० १ मं० ५॥

॥ भाष्यम् ॥

( अग्ने व्र० ) अस्याभिप्रा० सर्वैर्मनुष्यैरीश्वरस्य सहायेच्छा सदा कार्येति॥ नैव तस्य सहायेन विना सत्यधर्मज्ञानं तस्यानुष्ठानपूर्त्तिश्च भवतः। हे अग्ने व्रतपते सत्यपते ( व्रतं ) सत्यधर्मं चरिष्याम्यनुष्ठास्यामि अत्र प्रमाणम्॥ सत्यमेव देवा अनृतं मनुष्याः। एतद्वै देवाव्रतं चरन्ति यत्सत्यम्। श० कां० कां १ अ०१॥ सत्याचरणाद्देवा असत्याचरणान्मनुष्याश्च भवन्ति। अतः सत्याचरणमेव धर्ममाहुरिति ( तच्छकेयम् ) यथा तत्सत्याचरणं धर्मं कर्त्तुमहं शक्नेयं समर्थो भवेयम् (तन्मे राध्यताम्) तत्सत्यधर्माधर्मानुष्ठानं मे मम भवता राध्यतां कृपया सम्यक् सिद्धं क्रियताम्। किंच तद्व्रतमित्यत्राह ( इदमहमनृतात्सत्यमुपै० ) यत्सत्यधर्मस्यैवाचरणमनृतादसत्याचरणादधर्मात्पृथग्भूतं तदेवोपैमि प्राप्नोमीति। अस्यैव धर्मस्यानुष्ठानमीश्वरप्रार्थनया स्वपुरुषार्थेन च कर्त्तव्यम्। नापुरुषार्थिनं मनुष्यमीश्वरोनुगृह्णाति। यथा चक्षुष्मन्तं दर्शयति नान्धं च। एवमेव धर्मं कर्तुमिच्छन्तं पुरुषार्थकारिणमीश्वरानुग्रहाभिलाषिणं प्रत्येवेश्वरः कृपालुर्भवति नान्यं प्रतिचेति कुतः। जीवे तत् सिद्धं कर्तुं साधनानामीश्वरेण पूर्वमेव रचितत्वात् तदुपयोगाकरणाच्च। येन पदार्थेन यावानुपकारो ग्रहीतुं शक्यस्तावान्स्वेनैव ग्रहीतव्यस्तदुपरीश्वरानुग्रहेच्छा कार्य्येति॥ ६॥

व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम्॥ दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते॥ ७। य० अ० १९ मं० ३०।

॥ भाष्यम् ॥

( व्रतेन दी० ) अस्या० यदा मनुष्यो धर्मं जिज्ञासते सत्यं चिकीर्षति तदैव सत्यं विजानाति तच्चैव मनुष्यैः श्रद्धेयम्। नासत्यं चेति। यो मनुष्यः सत्यं व्रतमाचरति । तदा दीक्षामुत्तमाधिकारं प्राप्नोति। ( दीक्षया प्नोति द० ) यदा दीक्षितः सन्नुत्तमगुणैरुत्तमाधिकारी भवति तदा सर्वतः सत्कृतः फलवान् भवति सास्य दक्षिणा भवति तां दीक्षया (शुभगुणाचरणेनैवाप्नोति ) दक्षिणा श्र० ( सा दक्षिणा यदा ब्रह्मचर्य्या) दिसत्यव्रतैः सत्काराढ्या स्वस्यान्येषां च भवति तदाचरणे श्रद्धां दृढं विश्वासमुत्पादयति । कुतः । सत्याचरणमेव सत्कारकारकमस्त्यतः । ( श्रद्धया० ) यदोत्तरोत्तरं श्रद्धा वर्धेत तदा तया श्रद्धया मनुष्यैः परमेश्वरो मोक्षधर्मादिकं चाप्यते प्राप्यते नान्यथेति । अतः किमागतं सत्य प्राप्त्यर्थं सर्वदा श्रद्धोत्साहादिपुरुषार्थो वर्धयितव्यः ॥ ७ ॥

श्रमेण तपसा सृष्टा ब्रह्मणा वित्तऋतेश्रिता ॥ ८ ॥

सत्येनावृता श्रिया प्रावृता यशसा परीवृता ॥ ९ ॥ अथर्व० कां० १२ अनु ५ मं० १ । २ ।

॥ भाष्यम् ॥

( श्रमेण तपसा० ) अभिप्रा० श्रमेणेत्यादिमंत्रेषु धर्मस्य लक्षणानि प्रकाश्यन्त इति । श्रमः प्रयत्नः पुरुषार्थ उद्यम इत्यादि । तपो धर्मानुष्ठानं तेन श्रमेणैव तपसा च सहेश्वरेण सर्वे मनुष्याः सृष्टा रचिताः । श्रतः ( ब्रह्मणा ) वेदेन परमेश्वरज्ञानेन च युक्ताः सन्तो ज्ञानिनः स्यु· ( ऋतेश्रिता० ) ऋते ब्रह्मणि पुरुषार्थे चाश्रिता ऋतं सेवमानाश्च सः दैव भवन्तु ॥ ८ ॥ ( सत्येनावृ० ) वेदशास्त्रेण प्रत्यक्षादिभिः प्रमाणैश्च परीक्षितेनाव्यभिचारिणा सत्येनावृता युक्ताः सर्वे मनुष्याः सन्तु । ( श्रिया प्रावृ० ) श्रिया शुभगुणाचरणोज्ज्वलया चक्रवर्त्तिराज्यसेव

मानया प्रशस्तया लक्ष्म्याऽऽवृताः युक्ताः परमप्रयत्नेन भवन्तु (यशसा०) उत्कृष्टा गुणग्रहणं सत्याचरणं यशस्तेन परितः सर्वतोवृता युक्ताः सन्तः प्रकाशयितारश्च स्युः ॥ ९ ॥

**स्वधया परिहिता श्रद्धयापर्य्यूढा दीक्षया गुप्ता यज्ञे प्रतिष्ठता लोको निधनम् ॥ १० ॥ ओजश्च तेजश्च सहश्च बलं च वाक् चेन्द्रियं च श्रीश्च धर्मश्च ॥ ११ ॥ अथर्व० कां० १२ । अनु० ५ मं० ३ । ७ ॥**

## ॥ भाष्यम् ॥

(स्वधया परि०) परितः सर्वतः स्वकीयपदार्थशुभगुणधारणेनैव संतुष्य सर्वे मनुष्याः सर्वेभ्यो हितकारिणः स्युः (श्रद्धया प०) सत्यमेव विश्वासमूलमस्ति नासदिति तया सत्यो परिदृढविश्वासरूपया श्रद्धया परितः सर्वतऊढाः प्राप्तवन्तः सन्तु (दीक्षया गुप्ता) सद्भिरार्य्यैर्विद्वद्भिः कृतसत्योपदेशया दीक्षया गुप्ता रक्षिताः सर्वमनुष्याणां रक्षितारश्च स्युः (यज्ञे प्रतिष्ठिताः) (यज्ञो वै विष्णुः) व्यापके परमेश्वरे सर्वोपकारके ऽश्वमेधादौ शिल्पविद्याक्रिया कुशलत्वे च प्रतिष्ठिताः प्राप्तप्रतिष्ठाश्च भवन्तु (लोको निधनम्) अयं लोकः सर्वेषां मनुष्याणां निधनं यावन्मृत्युर्न भवेत्तावत्सर्वोपकारकं सत्कर्मानुष्ठानं कर्तुं योग्यमस्तीति सर्वैर्मन्तव्यमितीश्वरोपदेशः ॥ १० ॥ अन्यच्च । (ओजश्च) न्यायपालनान्वितः पराक्रमः (तेजश्च) प्रगल्भता धृष्टता निर्भयता निर्दीनता सत्ये व्यवहारे कर्त्तव्या (सहश्च) सुखदुःखहानिलाभादिक्लेशप्रदवर्त्तमानप्राप्तावपि हर्षशोका करणं तन्निवारणार्थं परमप्रयत्नानुष्ठानं च सहनं सर्वैः सदा कर्त्तव्यम् (बलं च) ब्रह्मचर्य्यादिसुनियमाचरणे न शरीरबुद्ध्यादिरोगनिराकरणं दृढाङ्गतानिश्चलबुद्धित्वसंपादनं भोषणादिकर्मयुक्तं बलं च कार्य्यमिति (वाक् च) विद्या शिक्षा सत्यमधुरभाषणादि शुभगुणयुक्ता वाणी कार्य्येति (इन्द्रियं च) मन आदीनि वाग्भिन्नानि षड् ज्ञानेन्द्रियाणि वाक्चेति

कर्मेन्द्रियाणामुपलक्षणेन कर्मेन्द्रियाणि च सत्यधर्माचरणयुक्तानि पापाद् व्यतिरिक्तानि च सदैव रक्षणीयानि ( श्रोश्च ) सम्राड्राज्यश्रीः परमपुरुषार्थेन कार्य्येति ( धर्मश्च ) अयमेव वेदोक्तो न्यायः पक्षपातरहितः सत्याचरणयुक्तः सर्वोपकारकश्च धर्मः सदैव सर्वैः सेवनीयः अस्यैवेयंपूर्वापरा सर्वा व्याख्यास्तीति बोध्यम् ॥ ११ ॥

अत्र धर्मविषये तैत्तिरीयशाखाया अन्यदपि प्रमाणम् । ऋतं च स्वाध्यायप्रवचने च । सत्यं च स्वा० तपश्च स्वा० दमश्च स्वा० शमश्च स्वा० ग्नयश्च स्वा० अग्निहोत्रं च स्वा० अतिथयश्च स्वा० मानुषं च स्वा० प्रजा च स्वा० प्रजनश्च स्वा० प्रजातिश्च स्वा० सत्यमिति सत्यवचाराथीतरः । तपइति तपोनित्यः पौरुशिष्टिः । स्वाध्ययप्रवचने एवेति नाको मौद्गल्यः । तद्धितपस्तद्धितपः ॥ १ ॥ वेदमनूच्याचार्य्योन्तेवासिनमनुशास्ति । सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः । आचार्य्याय प्रियं धनमाहृत्य प्रजातन्तुं माव्यवच्छेत्सीः । सत्यान्नप्रमदितव्यम् । धर्मान्न प्र० कुशलान्न प्र० भूत्यै न प्र० स्वाध्यायप्रवचनाभ्यां न प्र० देवपितृकार्य्याभ्यां न प्र० । मातृदेवो भव । पितृदेवो भव । आचार्य्यदेवो भव । अतिथिदेवो भव । यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि । यान्यस्माकꣳसुचरितानि तानि त्वयोपास्यानि ॥ २ ॥ नो इतराणि । एके चास्मच्छ्रेयाꣳसो ब्राह्मणाः । तेषां त्वयासनेन प्रश्वसितव्यम् । श्रद्धया देयम् । अश्रद्धया देयम् । श्रिया देयम् । ह्रिया देयम् । भिया देयम् । संविदा देयम् । अथ यदि ते कर्मविचिकित्सा वा वृत्तिविचिकित्सावास्यात् । ये तत्र ब्राह्मणः समदर्शिनः । युक्ता अयुक्ताः । अलूक्षाधर्मकामाः स्युः । यथा ते तत्र वर्त्तेरन् तथा तत्र वर्तेथाः । अथाभ्याख्यातेषु ये तत्र ब्राह्मणाः समदर्शिनः । युक्ता अयुक्ता अलूक्षाधर्मकामाः स्युः । यथा ते तेषु वर्त्तेरन् तथा तेषु वर्तेथाः । एष आदेशः । एष उपदेशः । एषा वेदोपनिषत् । एतदनुशासनम् । एवमुपासितव्यम् । एवमुचैतदुपास्यम् ॥ ४ ॥ तैत्तिरीय आरण्यके । प्रपा० ७ । अनु० ८ । ११ ॥

ऋतं तपः सत्यं तपः श्रुतं तपः शान्तं तपो दमस्तपः शमस्तपो दानं तपो यज्ञस्तपो भुर्भुवः स्वर्ब्रह्मै तदुपास्वैतत्तपः ॥ तैत्ति० आरण्य० प्रपा० अनु० ८ ॥ सत्यं परं परꣳ सत्यꣳ सत्येन नस्वर्गाल्लोकाच्च्यवन्ते कदाचन सताꣳ हि सत्यं तस्मात्सत्ये रमन्ते ॥ तपइति तपोनानशना- त्परं यद्धिपरं तपस्तद्दुर्धर्षं तद्दुराधर्षं तस्मात्तपसि० ॥ दमइति नियतं ब्रह्मचारिणस्तस्माद्दमे० ॥ शम इत्यरण्ये मुनस्तस्माच्छमे० ॥ दानमिति सर्वाणि भूतानि प्रशꣳ सन्ति दानान्नाति दुष्करं तस्माद्दाने० ॥ धर्मइति धर्मेण सर्वमिदं परिगृहीतं धर्मान्नति दुश्चरं तस्माद्धर्मे० ॥ प्रजनइति भूयाꣳसस्तस्माद्भूयिष्ठाः प्रजायन्ते तस्माद्भूयिष्ठाः प्रजनने० ॥ अग्नयइत्याह तस्मादग्नय आधातव्याः अग्निहोत्रमित्याह तस्मादग्निहोत्रे० ॥ यज्ञ- इति यज्ञेन हि देवादिवंगतास्तस्माद्यज्ञे० ॥ मानसमिति विद्वाꣳ सस्तः स्मादिद्वाꣳ स एव मानसे रमन्ते ॥ न्यास इति ब्रह्माब्रह्मा हि पर- परोहि ब्रह्मा तानि वा एतान्यवराणि तपाꣳसि न्यास एवात्यरे च यत् यएवं वेदेत्युपनिषत् ॥ प्रजापत्यो हारुणिः सुपर्णेयः प्रजापतिं पितर- मुपससार किं भगवन्तः परमं वदन्तीति तस्मै प्रोवाच सत्येन वायुरवाति सत्येनादित्यो रोचते दिवि सत्यं वाचः प्रतिष्ठा सत्ये सर्वं प्रतिष्ठितं तस्मात्सत्यं परमं वदन्ति ॥ तपसा देवा देवतामग्रआयन्तपसर्षयः स्वरन्वविन्दन् तपसा सपत्नान्प्रणुदामारातीस्तपसि सर्वं प्रतिष्ठितं तस्मातपः प० ॥ दमेन दान्ताः किल्विषमवधुन्वन्ति दमेन ब्रह्मचारिणः स्वर्गच्छन् दमोभूतानां दुराधर्षं दमे सर्वं प्रतिष्ठितं तस्माद्दमं प० ॥ शमेन शांताः शिवमाचरन्ति शमेन नाकं मुनयोन्वविन्दञ्छमोभूतानां दुराधर्षं शमे सर्वं तिष्ठितं तस्माच्छमंप०दानं यज्ञानां वरूथं दक्षिणालोके दातारꣳसर्वभूतान्युपजीवन्ति दानेनारातीरनुपानुदन्तदानेन द्विषन्तो मित्रा भवन्ति दाने सर्वं प्रतिष्ठितं तस्माद्दानं प० धर्मो विश्वस्य जगतः प्रतिष्ठालोके धर्मिष्ठं प्रजा उपसर्पन्ति धर्मेण पापमपनुदन्ति धर्मे सर्वं प्रतिष्ठितं तस्माद्धर्मं प० प्रजननं वै प्रतिष्ठालोके साधुप्रजायास्तन्तुं तन्वानः पितॄणामनृणो भवति तदेव तस्य अनृणं तस्मात्प्रजननं प० अग्नयो वै

त्रयीविद्या देवयानः पन्था गार्हपत्यऋक् पृथिवीरथन्तरमन्वाहार्य्यपचनो यजुरन्तरिक्षं वामदेव्यमाहवनीयः साम सुवर्गो लोको बृहत्तस्मादग्नीन्य अग्निहोत्रꣳसायं प्रातर्गृहाणा निष्कृतिः स्विष्टꣳसुहुतं यज्ञक्रतूनां प्रायणꣳसुवर्गस्य लोकस्य ज्योतिस्तस्मादग्निहोत्रं प० ॥ यज्ञ इति यज्ञेन हि देवा दिवंगता यज्ञेनासुरानपानुदन्त यज्ञेन द्विषन्तो मित्रा भवन्ति यज्ञे सर्वं प्रतिष्ठितं तस्माद्यज्ञं प० ॥ मानसं वै प्राजापत्यं पवित्रं मानसेन मनसा साधु पश्यति मानसः ऋषयः प्रजा असृजन्तमानसे सर्वं प्रतिष्ठितं तस्मान्मानसं परमं वदन्ति ॥ तैत्ति० आरण्य० प्रपा १० अनु० ६२। ६३ ॥ ( एतेषामभि० ) सर्वैर्मनुष्यैरेतानि वक्ष्यमाणानि धर्मलक्षणानि सदैव सेव्यानीति। ( ऋतं च० ) यथार्थस्वरूपं वा ज्ञानं ( सत्यं च० ) सतस्याचरणं च ( तपश्च ) ज्ञानधर्मयोर्ऋतादिधर्म लक्षणान यथावदनुष्ठानम् ( दमश्च ) अधर्माचरणादिन्द्रियाणि सर्वथा निवर्त्यां तेषां सत्यधर्माचरणे सदैव प्रवृत्तिः कार्य्या (शमश्च०) नैव मनसापि कदा चिदधर्मकरणेच्छा कार्य्येति ( अग्नयश्च ) वेदादिशास्त्रेभ्योग्न्यादिपदार्थेभ्यश्च पारमार्थिक व्यावहारिक विद्योपकारकरणम् ( अग्निहोत्रं च ) नित्यहोममारभ्याश्वमेधपर्य्यन्तेन यज्ञेन वायुवृष्टिजलशुद्धिद्वारा सर्वप्राणिनां सुखसंपादनंकार्य्यम् ( अतिथय० ) पूर्णविद्यावतां धर्मात्मनां संगसेवाभ्यां सत्य शोधनं छिन्नसंशयत्वं च कार्य्यम् (मानुषं च०) मनुष्यसंबन्धिराज्यविद्यादिवित्तं सम्यक् सिद्धं कर्त्तव्यम् ( प्रजा च० ) धर्मेणैव प्रजामुत्पाद्य सा सदैव सत्यधर्मविद्या सुशिक्षयान्विता कार्य्या (प्राजनश्च०) वीर्य्यवृद्धिः पुत्रेष्टिरीत्या ऋतुप्रदानं च कर्त्तव्यम्। ( प्रजातिश्च० ) गर्भरक्षाजन्मसमये संरक्षणं संतानशरीरवृद्धिवर्धनं च कर्त्तव्यम् (सत्यमिति ) मनुष्यः सदा सत्यवक्तैव भवेदिति राथीतराचार्य्यस्य मतमस्ति (तपइति०) यहतादि सेवनेनैव सत्यविद्या धर्मानुष्ठानमस्ति तन्नित्यमेव कर्त्तव्यमिति पौरुशिष्टेराचार्य्यस्य मतमस्ति। परन्तु नाकोमौद्गल्यस्येदं मतमस्ति स्वाध्यायो वेदविद्याध्ययनं प्रवचनं तदध्यापनं चेत्युभयं सर्वेभ्यः श्रेष्ठतमं कर्मास्ति। इदमेव मनुष्येषु परमं तपोस्ति नातःपरमु-

ऽमं धर्मलक्षणं किंचिद्विद्यत इति ( वेदमनूच्या० ) आचार्य्यः शिष्याय वेदानध्याप्यधर्ममुपदिशति हे शिष्य त्वया सदैव सत्यमेव वक्तव्यम् सत्यभाषणादिलक्षणोधर्मश्च सेवनीयः शास्त्राध्ययनाध्यापने कदापि नैव त्याज्ये आचार्य्यसेवा प्रजोत्पत्तिश्च सत्यधर्मकुशलतैश्वर्य्यसंवर्धन-सेवने सदैव कर्त्तव्ये देवा विद्वांसः पितरो ज्ञानिनश्च तेभ्यो ज्ञानग्रहणं तेषां सेवनं च सदैव कार्य्यमेवं मातृपित्राचार्य्यातिथीनां सेवनं चैतत्सर्वं प्रितया कर्त्तव्यम्। नैतत्कदापि प्रमादात्त्याज्यमिति। वक्ष्यमाणरीत्या-मात्रादय उपदिशेयुः। भोः पुत्रायान्युत्तमानि कर्म्माणि वयं कुर्मस्ता-न्येव युष्माभिराचरितव्यानि यानि तु पापात्मकानि कानिचिदस्माभिः क्रियन्ते तानि कदापि नैवाचरणीयानि। ये ऽस्माकं मध्ये विद्वांसो ब्रह्मविदः स्युस्तत्संगस्तदुक्तविश्वासश्च सदैव कर्त्तव्यो नेतरेषाम्। मनुष्यै-सर्वैर्विद्यादिपदार्थदानं प्रीत्याऽप्रीत्या श्रिया लज्जया भयेन प्रतिज्ञया च तदैव कर्त्तव्यम्। अर्थात्प्रतिग्रहाद्दानमतीव श्रेयस्करमिति। भो शिष्य संव कस्मिंश्चित्कर्मण्याचरणे च संशयो भवेत्तदा ब्रह्मविदां पक्षपातर-हितानां योगिनामधर्मात् पृथग्भूतानां विद्यादिगुणैः स्निग्धानां धर्म-कामानां विदुषां सकाशात्तदुत्तरं ग्राह्यं तेषामेवाचरणं च। यादृशेन मार्गेण ते विचरेयुस्तेनैव मार्गेण त्वयापि गन्तव्यम्। अयमेव युष्माकं हृदय आदेश उपदेशोहि स्थाप्यत इयमेव वेदानामुपनिषदस्ति। ईदृ-शमेवानुशासनं सर्वैर्मनुष्यैः कर्त्तव्यम्। ईदृगाचरणपुरःसरमेव परमश्रद्ध-या सच्चिदानन्दादिलक्षणं ब्रह्मोपास्यं नान्यथेति॥ इदानीं तपसो लक्षण-मुच्यते॥ ऋतं यत्तत्वं ब्रह्मणएवोपासनं यथार्थज्ञानं च (सत्यं)० सत्य-कथनं सत्यमाचरणं च ( श्रुतं० )सर्वविद्याश्रवणं श्रावणंच। ( शान्तं० ) अधर्मात्पृथक्कृत्यमनसो-धर्मे संस्थापनं मनः शान्तिः। ( दमस्त० ) इन्द्रि-याणां धर्मएव प्रवर्त्तनमधर्मान्निवर्त्तनं च, ( शमस्त० ) इन्द्रियाणां धर्म एव प्रवर्त्तनमधर्मान्निवर्त्तनं च, ( शमस्त० ) मनसोपि निग्रहस्याधर्मा-द्धर्मे प्रवर्त्तनं च॥ ( दानं त० ) तथा सत्यविद्यादिदानं सदा कर्त्तव्यमं ( यज्ञस्त० ) पूर्वोक्तं यज्ञानुष्ठानं चैतत्सर्वं तपशब्देन गृह्यते नान्यदिति

अन्यच्च । ( भूर्भू० ) हे मनुष्य सर्वलोकव्यापकं यद्ब्रह्मास्ति तदेव त्वमुपास्वेदमेव तपोमन्यथ्वं नातो विपरीतमिति । ( सत्यं प० ) सत्यभाषणात्सत्याचरणाच्च परं धर्मलक्षणं किंचिन्नास्त्येव । कुतः । सत्येनैव नितरां मोक्षसुखं संसारसुखं च प्राप्य पुनस्तस्मान्नैव कदापि च्युतिर्भवति । सत्पुरुषाणामपि सत्याचरणमेव लक्षणमस्ति तस्मात्कारणात्सर्वैर्मनुष्यैः सत्ये खलु रमणीयमिति ॥ तपस्तु ऋतादिधर्मलक्षणानुष्ठानमेव ग्राह्यम् ॥ एवं सम्यग्ब्रह्मचर्य्यसेवनेन विद्याग्रहणं ब्रह्म इत्युच्यते । एवमेव दानादिष्वर्थगतिः कार्य्या । विदुषो लक्षणं मानसो व्यापारः । एवमेव सत्येन ब्रह्मणा वायुरागच्छति । सत्येनादित्यः प्रकाशितो भवति सत्येनैव मनुष्याणां प्रतिष्ठा जायते नान्यथेति । मानसा ऋषयः प्राणविज्ञानादयश्चेति ॥

सत्येन लभ्यस्तपसा ह्येष आत्मा स सम्यङ् ज्ञानेन ब्रह्मचर्य्येण नित्यम् ॥ अन्तः शरीरे ज्योतिर्मयो हि शुभ्रो यं पश्यन्ति यतयः क्षीणदोषाः ॥ १ ॥ सत्यमेव जयते नानृतं सत्येन पन्था विततो देवयानः येनाक्रमन्त्यृषयो ह्याप्तकामा यत्र तत्सत्यस्य परमं निधानम् ॥ २ ॥ मुण्डकोपनिषदि । मुं० ३ खं० १ मं० ५ । ६ ॥ अनयोरर्थः ॥ ( सत्येन लभ्य० ) सत्येन सत्यधर्माचरणेनैवात्मा परमेश्वरो लभ्यो नान्यथेत्ययं मन्त्रः सुगमार्थः ॥ १ ॥ ( सत्यमेव० ) सत्यमाचरितमेव जयते तेनैव मनुष्यः सदा विजयं प्राप्नोति । अनृतेनाधर्माचरणेन पराजयं च । तथा सत्यधर्मेणैव देवयानो विदुषां यः सदानन्दप्रदो मोक्षमार्गोस्ति सोपि सत्येनैव विस्तृतः प्रकाशितो भवति ॥ येन च सत्यधर्मानुष्ठानप्रकाशितेन मार्गेणाप्तकामा ऋषयस्तत्रा क्रमन्ति गच्छन्ति यत्र सत्यस्य धर्मस्य परमं निधानमधिकरणं ब्रह्म वर्त्तते तत्राप्यनित्यानन्दमोक्षप्राप्ता भवन्ति । नान्यथेति । अतएव सत्यधर्मानुष्ठानमधर्मत्यागश्च सर्वैः कर्त्तव्य इति ॥

अन्यच्च । चोदना लक्षणोर्थोधर्मः ॥ १ ॥ पू० मी० अ० १ पा० १ सू० २ । यतोऽभ्युदयनिःश्रेयससिद्धिः सधर्मः ॥ २ ॥ वैशेषिके । अ० १ पा० १ । स २ ॥ अनयोरर्थः ( चोदना० ) वेदवाण्या सत्यधर्माचरणस्य

प्रेरणास्ति तथैव सत्यधर्मो लक्ष्यते। यो ऽनर्थादधर्माचरणाद्वहिरस्त्यतो धर्माख्यां लब्ध्वाऽर्थो भवति। यस्येश्वरेण निषेधः क्रियते सो ऽनर्थरूपत्वादधर्मोयमिति ज्ञात्वा सर्वैर्मनुष्यैस्त्याज्य इति ॥ १ ॥ (यतोभ्यु०) यस्याचरणादभ्युदयः सांसारिकमिष्टसुखं सम्यक् प्राप्तं भवति येन च निश्रेयसं पारमार्थिकं मोक्षसुखं च। स एव धर्मो विज्ञेयः। अतो विपरीतोह्यधर्मश्च। इदमपि वेदानामेव व्याख्यानमस्ति। इत्यनेकमंत्रप्रमाणसाक्ष्यादिधर्मोपदेशो वेदेष्वीश्वरेण। सर्वमनुष्यार्थमुपदिष्टो ऽस्त्येक एवायं सर्वेषां धर्मोस्ति नैव चास्माद्वितीयोस्तीति वेदितव्यम् ॥ २ ॥

इति वेदोक्तधर्मविषयः संक्षेपतः समाप्तः ॥

---

Contents of the First Part.

## प्रथम भाग का सूची पत्र—

१—Chapter I वेदसंज्ञाविचारः २ वेदविषयविचारः
३ वेदोत्पत्तिविषयः ४ वेदानांनित्यत्व
विचारः ... ... पृष्ट १—१० तक
२—Chapter II ब्रह्मविद्याविषय विचारः ... ,, १०—२१ तक
३—Chapter III उपासनाविषयः ... ,, २१—३८ तक
४—Chapter IV पुनर्जन्मविषयः संक्षेपतः ... ,, ३८—४४ तक
५—Chapter V वर्णाश्रम विषयः संक्षेपतः ,, ४५—५६ तक
६—Chapter VI वेदोक्तधर्मविषयः संक्षेपतः ,, ५६—६८ तक

प्रथम भाग समाप्तम्

---

# PART II.

## Chapter VII.

### SECTION I.

### ॥ अथ पृथिव्यादि लोक भ्रमणविषयः ॥

अथेदं विचार्य्यते पृथिव्यादयोलोका भ्रमन्त्याहोस्विन्नेति। अत्रो-च्यते। वेदादिशास्त्रोक्तरीत्या पृथिव्यादयोलोकाः सर्वे भ्रमन्त्येव। तत्र पृथिव्यादिभ्रमणविषये प्रमाणम्॥

**आयंगौः पृश्निरक्रमीदसदन्मातरं पुरः। पितरं च प्रयन्त्स्वः॥ १॥ य० अ० ३ मं ६॥**

अस्या भि० आयंगौरित्यादिमंत्रेषु पृथिव्यादयोहि सर्वेलोका भ्रमन्त्येवेति विज्ञेयम्॥ ( आयंगौः० ) अयंगौः पृथिवीगोलः सूर्य्यश्चन्द्रोऽन्यो लोको वा पृश्निमन्तरिक्षमाक्रमीदाक्रमणं कुर्वन्सन् गच्छतीति तथाऽन्येपि। तत्र पृथिवीमातरं समुद्रजलमसदत् समुद्रजलं प्राप्ता सती। तथा ( स्वः ) सूर्य्यंपितरमग्निमयं च। पुरः पूर्वं पूर्वं प्रयन्त्सन् सूर्य्यस्य परितो पितरो एवमेव सूर्य्यो वायुं पितरमाकाशं मातरं च। तथा चन्द्रोग्निं पितरमपोमातरं प्रतिचेति योजनीयम्॥ अत्र प्रमाणानि। गौः। ग्मा ज्मेत्याद्येकविंशतिषु पृथिवीनामसु गौरिति पठितं यास्क-कृते निघण्टौ। तथाच। स्वः। पृश्निः। नाकइति षट्सु साधारणनामसु पृश्निरित्यन्तरिक्षस्य नामोक्तम्॥ निरुक्ते। गौरिति पृथिव्यानामधेयं यद्दूरंगता भवति यच्चास्यां भूतानि गच्छन्ति। निरु० अ० २ खं० ५॥ गौरादित्यो भवति गमयति रसान् गच्छत्यन्तरिक्षेथ द्यौर्यत् पृथिव्या अधिदूरंगता भवति यच्चास्यां ज्योतींषि गच्छन्ति। निरु० अ० २ खं० १४॥ सूर्य्यरश्मिश्चन्द्रमागंधर्व इत्यपि निगमो भवति सोपि गौरुच्यते। निरु० अ० २ खं० ६। स्वरादित्यो भवति। निरु० अ० २ खं० १४

गच्छति प्रतिक्षणं भ्रमति या सा गौः पृथिवी। अद्भ्यः पृथिवीति तैत्तिरीयोपनिषदि। यस्माद्यज्जायते सो ऽर्थस्तस्य मातापितृवद् भवति तथास्वः शब्देनादित्यस्य ग्रहणात् पितुर्विशेषणत्वादादित्योऽस्याः पितृवदिति निश्चीयते। यद्दूरंगता दूरंदूरं सूर्य्याद्गच्छतीति विज्ञेयम्। एवमेव सर्वे लोकाः स्वस्य स्वस्य कक्षायां वाय्वात्मनेश्वरसत्तया च धारिता सन्तो भ्रमन्तीति सिद्धान्तो बोध्यः॥

या गौर्वर्त्तनिं पर्य्येति निष्कृतं पयो दुहाना व्रतनीरवारतः। सा प्रब्रुवाणा वरुणाय दाशुषे देवेभ्यो दाशद्धविषा विवस्वते॥ २॥ ऋ० अ० ८ अ० २ व० १० मं० ॥ १॥ ॥ भाष्यम्॥

( या गौर्वर्त्तनिं० ) या पूर्वोक्ता गौर्वर्त्तनिं स्वकीयमार्गं ( अवारतः ) निरंतरं भ्रमती सती पर्य्येति। विवस्वतेऽर्थात्सूर्य्यस्य * परितः सर्वतः स्वस्वमार्गं गच्छति। ( निष्कृतं ) कथंभूतं मार्गं तत्तद्गमनार्थमीश्वरेण ( निष्कृतं ) निष्पादितम्। ( पयो दुहाना० ) अवारतो निरंतरं पयोदुहाना ऽनेकरसफलादिभि प्राणिनः प्रपूरयन्ती। तथा व्रतनी व्रतं स्वकीयभ्रमणादि सत्यनियमं प्रापयन्ती ( साप्र० ) दाशुषे दानकर्त्रे वरुणाय श्रेष्ठकर्मकारिणे देवेभ्यो विद्वद्भ्यश्च हविषा हविर्दानेन सर्वाणि सुखानि दाशत् ददाति किं कुर्वती प्रब्रुवाणा सर्वप्राणिनां व्यक्तवाण्या हेतुभूतासतीयं वर्त्तत इति॥ २॥

त्वं सोम पितृभि संविदानो ऽनुद्यावां पृथिवी आततंथ। तस्मै तइन्द्रो हविषा विधेम वयंस्याम पतयोरयीणाम्॥ ३॥ ऋ० अ० ६ अ० ४ व० १३ मं० ३॥

---

* सुपांसु लुगितिसूत्रेण विवस्वत इति प्राप्ते विवस्वते चेति पदं जायते॥

## ॥ भाष्यम् ॥

(त्वं सोम॰) अस्याभिप्रा॰ अस्मिन्मन्त्रे चन्द्रलोकः पृथिवीमनुभ्रमतीत्ययं विशेषोस्ति। अयं सोमश्चन्द्रलोकः पितृभिः पितृवत्पालकैर्गुणैः सह संविदानः सम्यक् ज्ञातःसन् भूमिमनुभ्रमति। कदा चित्सूर्यपृथिव्योर्मध्येपि भ्रमन्सन्नागच्छतीत्यर्थः अस्यार्थं भाष्यकरणसमये स्पष्टतया वक्ष्यामि। तथा द्यावापृथिवी एजेते इति मंत्रवर्णार्थाद्यौः सूर्यः पृथिवी च भ्रमतश्चल तइत्यर्थः। अर्थात्स्वस्यां स्वस्यां कक्षायां सर्वे लोका भ्रमन्तीति सिद्धम् ॥ इति पृथिव्यादिलोकभ्रमणविषयः संक्षेपतः

SECTION II.

## ॥ अथाकर्षणानुकर्षणविषयः ॥

यदा ते हर्य्यता हरी वा वृधा ते दिवे दिवे। आदित्ते विश्वा भुवनानि येमिरे ॥ १ ॥ ऋ॰ अ॰ ६ अ॰ १ व॰ ६ मं॰ ३ ॥

## ॥ भाष्यम् ॥

(यदा ते॰) अस्याभिप्रा॰ सूर्य्येण सह सर्वेषां लोकानामाकर्षणमस्तीश्वरेण सह सूर्य्यादिलोकानां चेति। हे इन्द्रेश्वर वा वायो सूर्य्य यदा यस्मिन्काले ते हरी आकर्षण प्रकाशन हरणशीलौ बलपराक्रमा गुणावश्वौ किरणौ वा हर्य्यता हर्य्यतौ प्रकाशवन्तावत्यन्तं वर्धमानौ भवतस्ताभ्यां (आदित्) तदनन्तरं (दिवेदिवे) प्रतिदिनं प्रतिक्षणं च ते तव गुणाः प्रकाशाकर्षणादयो (विश्वा) विश्वानि सर्वाणि भुवनानि सर्वान् लोकानाकर्षणेन येमिरे नियमेन धारयन्ति। अतःकारणात्सर्वे लोकाः स्वांस्वां कक्षां विहायेतस्ततो नैव विचलन्तीति ॥ १ ॥

यदा ते मारुतीर्विशस्तुभ्यमिन्द्रनियेमिरे॥ आदित्ते विश्वा भुवनानि येमिरे ॥ २ ॥ ऋ॰ अ॰ ६ अ॰ १ व॰ ६ मं॰ ४ ॥

॥ भाष्यम् ॥

( यदा ते मारुती ) [अस्याभिप्रा० अत्रापि पूर्वमंत्रवद
द्यास्तीति । हे पूर्वोक्तेन्द्र यदा ते तव मारुतीमोरुतरो म
मरुत्प्रधाना वा विशः प्रजास्तुभ्यं येमिरे तवाकर्षणधारणनि
वन्ति तदैव सर्वाणि विश्वानि भुवनानि स्थितिं लभन्ते ।
गुणैर्नियेमिरे । आकर्षणनियमं प्राप्नवन्ति सन्ति । अत
भुवनानि यथा कक्षं भ्रमन्ति वसन्ति च ॥ २ ॥

यदा सूर्य्यममुं दिवि शुक्रं ज्योतिरधारय
त्तेविश्वा भुवनानि येमिरे ॥ ३ ॥ ऋ० अ०
व० ६ मं० ५ ॥ ॥ भाष्यम् ॥

( यदा सूर्यं० ) अभि० अत्रापि पूर्ववदभिप्रायः । हे
सूर्य्यं भवानचितबानस्ति । यद्दिविद्योतनात्मके त्वयि शुक्रमन
ज्योतिः प्रकाशमयं वर्त्तते । तेन त्वं सूर्य्यादिलोकानधारयो
नसि ( आदित्ते ) तदनन्तरं ( विश्वा ) विश्वानि सर्वाणि
सूर्य्यादयो लोका अपि ( येमिरे ) तदा कर्षणनियमेनैव स्थिरा
अर्थाद्यथा सूर्य्यस्या कर्षणेन पृथिव्यादयोलोकास्तिष्ठन्ति । त
श्वरस्याकर्षणेनैव सूर्य्यादयः सर्वे लोका नियमेन सह वर्त्तन्त

व्यस्तभ्नाद्रोदसी मित्रो अद्भुतोन्तर्वावदकृ
तिषा तमः । विचर्मणीव धिषणे अवर्त्तयद्वैश्वां
श्वमधत्त वृष्ण्यम् ॥ ४ ॥ ऋ० अ० ४ अ० ५ व० १

॥ भाष्यम् ॥

( व्यस्तभ्नाद्रोदसी० ) अभि० । परमेश्वर सूर्य्यलोकौ
नाकर्षणप्रकाशाभ्यां धारयत इति । हे परमेश्वर तव सामर्थ्ये

नरः पूर्वोक्तः सूर्य्यादिलोको रोदसी द्यावापृथिव्यौ भूमिप्रकाशौ व्यस्तम्भनात्स्तम्भितवानस्ति । अतो भवान् मित्रइव सर्वेषां लोकानां व्यवस्थापकोऽस्ति । अद्भुत आश्चर्य्यस्वरूपः स सवितादिलोको ज्योतिषा तमोन्तरक्षणोतिरोहितं निवारितंतमः करोति । वावत्तथैव धिषणे धारणकर्त्र्यौ द्यावापृथिव्यौ धारणाकर्षणेन व्यवर्त्तयत् । विविधतयैतयोर्वर्त्तमानं कारयति । विविधतयैतयोर्वर्त्तमानं कारयति । कस्मिन्निव चर्मण्याकर्षितानि लोमानीव । यथा त्वचि लोमानि स्थितान्याकर्षितानि भवन्ति । तथैव सूर्य्यादिबलाकर्षणेन सर्वे लोकाः स्थापिताः सन्तीति विज्ञेयम् । अतः किमागतं वृष्णं वीर्य्यवद्विश्वं सर्वं जगच्च सूर्य्यादिलोको धारयति सूर्य्यादेर्धारणमीश्वरः करोतीति ॥ ४ ॥

आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यं च । हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥ १ ॥ य० अ० ३३ मं० ४३ ॥

॥ भाष्यम् ॥

( आकृष्णेन० ) अभि० अत्राप्याकर्षणविद्यास्तीति । सविता परमात्मा सूर्य्यलोको वा रजसा सर्वैर्लोकैः सहाकृष्णेनाकर्षणगुणेनासह वर्त्तमानोस्ति । कथंभूतेन गुणेन हिरण्ययेन ज्योतिर्मयेन । पुनः कथंभूतेन रमणानन्दादिव्यवहारसाधकज्ञानतेजोरूपेण रथेन किंकुर्वन् सन्मर्त्यं मनुष्यलोकममृतं सत्यविज्ञानं किरणसमूहं वा स्वस्वकक्षायां निवेशयन्व्यवस्थापयन्सन् । तथा च मर्त्यं पृथिव्यात्मकं लोकं प्रत्यमृतं मोक्षमोषध्यात्मकं वृष्ट्यादिकं रसं च प्रवेशयन्सन्सूर्यो वर्त्तमानोस्ति । सचसूर्य्योदेवो द्योतनात्मको भुवनानि सर्वान् लोकान्धारयति । तथा पश्यन्दर्शयन्सन् रूपादिकं विभक्तं याति प्रापयतीत्यर्थः । अस्मात्पूर्वमन्त्राद् द्युभिरक्तुभिरिति पदानुवर्त्तनात्सूर्य्योद्युभिः सर्वैर्दिवसैरक्तुभिः सर्वाभिरात्रिभिश्चार्यात्सर्वाँल्लोकान्प्रतिक्षणमाकर्षतीति गम्यते । एवं स-

वेषु लोकेष्वात्मिका स्वास्वाप्याकर्षणशक्तिरस्त्येव । तथानन्ताकर्षणश-क्तस्तु खलु परमेश्वरेस्तीति मन्तव्यम् । रजोलोकानां नामास्ति । अत्राहुर्निरुक्तकारायास्काचार्य्याः ॥ लोका रजां स्युच्यन्ते । निरु० अ०४ खं० १८ रथो रंहतेर्गतिकर्मण: स्थिरतेर्वा स्याद्विपरीतस्य रममाणोस्मि-स्तष्ठतीति वारयतेर्वा रसतेर्वा । निरु० अ० ८ खं० ११ ॥ विश्वानरा स्यादितास्य । निरु० अ० १२ खं० २१ ॥ अतो रथशब्देन रमणानंदकरं ज्ञानं तेजो गृह्यते । इत्याद्योमन्त्रा वेदेषु धारणाकर्षणविधायका बहवः सन्तीति बोध्यम् ॥ १ ॥

SECTION III.

## ॥ अथ प्रकाश्यप्रकाशकविषयः संक्षेपतः ॥

सूर्य्येण चन्द्रादयः प्रकाशिता भवन्तीत्यत्र विषयेविचारः ।

सत्येनोत्तभिताभूमिः सूर्य्येणोत्तभिताद्यौः ॥ ऋते-नादित्यास्तिष्ठन्ति दिवि सोमो अधिश्रितः ॥ १ ॥ सोमे-नादित्या बलिनः सोमेन पृथिवी मही ॥ अथोनक्षत्राणा मेषामुपस्थे सोम आहितः ॥ २ ॥ अथर्व० कां० १४ अनु १ मं० १ । २ । कः स्विदेकाकी चरति कउस्विज्जा-यते पुनः ॥ किᳬ स्विद्धिमस्य भेषजं किंवा वपनं महत् ॥ ३ सूर्य्यएकाकी चरति चन्द्रमा जायते पुनः ॥ अग्निर्हि-मस्य भेषजं भूमिरावपनं महत् ॥ ४ ॥ य० अ० २३ मं० ९ । १० ॥ ॥ भाष्यम् ॥

( सतेनो० ) एषामभि० अत्र चन्द्रपृथिव्यादिलोकानां सूर्य्यः प्र-काशकोस्तीति । इयं भूमिः सत्येन नित्यस्वरूपेण ब्रह्मणोत्तभिताध्र्व-

माकाशमध्ये धारितास्ति वायुना सूर्य्येण च। ( सूर्य्येण० ) तथाद्यौः सर्वः प्रकाशः सूर्य्येणोत्तितो धारितः ( ऋतेन० ) कालेन सूर्य्येण वायुना वा ऽऽदितया द्वादशमासाः किरणास्त्रसरेणवो बलवन्तःसन्तो वा तिष्ठन्ति ( दिवि सोमो अधिश्रितः ) एवं दिवि द्योतनात्मके सूर्य्यप्रकाशे सोमश्चन्द्रमा अधिश्रित आश्रितः सन्प्रकाशितो भवति। अर्थाच्चन्द्रलोकादिषु स्वकीयः प्रकाशो नास्ति। सर्वे चन्द्रादयोलोकाः सूर्य्यप्रकाशेनैव प्रकाशिता भवन्तीति वेद्यम् ॥ १ ॥ ( सोमेनादितया०) सोमेन चन्द्रलोकेन सहादितयाः किरणाः संयुज्य ततो निवृतय च भूमिं प्राप्य बलिनो बले कर्त्तुं शोला भवन्ति तेषां बलप्रापकशीलत्वात्। तद्यथा। यावन्तो ऽन्तरिक्षदेशे सूर्य्यप्रकाशस्यावरणं पृथिवी करोति तावति देशेऽधिकं शीतलत्वं भवति। तत्र सूर्य्यकिरणपतनाभावात्तदभावे चोष्णत्वाभावात्ते बलकारिणो बलवन्तो भवन्ति। सोमेन चन्द्रमसः प्रकाशेन सोमाद्यौषध्यादिना च पृथिवी मही बलवती पुष्टा भवति। अथो इतयनन्तरमेषां नक्षत्राणामुपस्थे समीपे चन्द्रमा आहितः स्थापितः सन्वर्त्तत इति विज्ञेयम्॥ २ ॥ ( कः स्वि० ) को ह्येकाकी ब्रह्माण्डे चरति। कोऽत्र स्वेनैव स्वयं प्रकाशितःसन् भवन्तीति। कः पुनः प्रकाशितो जायते हिमस्य शीतस्य भेषजमौषधं किमस्ति। तथा बीजारोपणार्थं महत् क्षेत्रमिव किमत्र भवतीति प्रश्नाश्चत्वारः ॥ ३ ॥ एषां क्रमेणोत्तराणि। ( सूर्य्य एकाकी० ) अस्मिन्संसारे सूर्य्य एकाकीचरति स्वयंप्रकाशमानः सन्नन्यान्सर्वान् लोकान्प्रकाशयति तस्यैव प्रकाशेन चन्द्रमा पुनः प्रकाशितो जायते नहि चन्द्रमसि स्वतः प्रकाशः कश्चिदस्तीति। अग्निर्हिमस्य शीतस्य भेषजमौषधमस्तीति। भूमिर्महद्दा वपनं बीजारोपणादेरधिकरणं क्षेत्रं चेति वेदेष्वेतद्विषयप्रतिपादका एवंभूता मंत्रा बहवः सन्ति॥ ४ ॥

## Chapter VIII.

### SECTOIN I.

## ॥ अथ गणितविद्याविषयः ॥

एकाचमे तिस्रश्चमे तिस्रश्चमे पञ्चचमे पञ्चचमे

सप्तच मे सप्तचमे नवचमे नवचम एकादशचम एकादश-
चमे त्रयोदशचमे त्रयोदशचमे पञ्चदशचमे पञ्चदशचमे
सप्तदशचमे सप्तदशचमे नवदशचमे नवदशचम एकवि-
ꣳशतिश्चम एकविꣳशतिश्चमे त्रयोविꣳशतिश्चमे त्रयो-
विꣳशतिश्चमे पञ्चविꣳशतिश्चमे पञ्चविꣳशतिश्चमे सप्त
विꣳशतिश्चमे सप्तविꣳशतिश्चमे नवविꣳशश्चिमे नववि-
ꣳशतिश्चम एकत्रिꣳशच्चम एकत्रिꣳशच्चमे त्रयस्त्रिꣳ-
शच्चमे यज्ञेनकल्पन्ताम् ॥ १ ॥ चतस्रश्चमे ऽष्टौचमे ऽष्टा-
चमे द्वादशचमे द्वादशचमे षोड़शचमे षोड़शचमे विꣳ-
शतिश्चमे विꣳशतिश्चमे चतुर्विꣳशतिश्चमे चतुर्विꣳशति
श्चमे ऽष्टाविꣳशतिश्चमे ऽष्टाविꣳशतिश्चमे द्वात्रिꣳशच्चमे
द्वात्रिꣳशच्चमे षट्त्रिꣳशच्चमे षट्त्रिꣳसच्चमे चत्वारिꣳ-
शच्चमे चत्वारिꣳशच्चमे चतुश्चत्वारिꣳशच्चमे चतुश्चत्वारि-
ꣳशच्चमे ऽष्टाचत्वारिꣳशच्चमे यज्ञेन कल्पन्ताम् ॥ २ ॥
य० अ० १८ मं ॥ २४ ॥ २५ ॥

॥ भाष्यम् ॥

अभि० अनयोर्मंत्रयोर्मध्ये खल्वीश्वरेणाङ्कबीजरेखागणितं प्रका-
शितमिति ( एका० ) एकार्थस्य या वाचिका संख्यस्ति । १ । सैकेन

युक्ता द्वौ भवतः । २ । यत्र द्वावेकेन युक्तौ सा त्रित्ववाचिका (३) ॥ १ ॥ द्वाभ्यां द्वौ युक्तौ चत्वारः । ४ । एवं तिसृभिस्त्रित्वसंख्यायुक्ता षट् (६) एवमेव चतस्रश्चमे पञ्चचमे इत्यादिषु परस्परं संयोगादिक्रिययाऽनेकविधाङ्कैर्गणितविद्या सिध्यति । अन्यत्खल्वत्रानेकचकराणां पाठान्मनुष्यै रनेकविधा गणितविद्याः सन्तीति वेद्यम् सेयं गणितविद्या वेदांगे ज्योतिषशास्त्रे प्रसिद्धास्त्यतो नात्र लिख्यते । परंत्वीदृशामंत्रा ज्योतिषशास्त्रस्य गणितविद्याया मूलमिति विज्ञायते । इयमङ्कसंख्या निश्चितेषु संख्यातपदार्थेषुप्रवर्त्तते येचाज्ञातसंख्याः पदार्थास्तेषां विज्ञानार्थं बीजगणितं प्रवर्त्तते । तदपि विधनमेका चेति । अ१—क३ इत्यादि संकेतैनैतन्मंत्रादिभ्यो बीजगणितं निःसरतीत्यवधेयम् । २ ।

"अ१ग्न३ आ१या२हि वी१त२ये२ गृणा३नो१ ह२व्य१दा२तये ॥ नि१हो१ता२र२ सत्सि ब२र्हि१षि२" १ ॥ साम छं० । प्र० १ । खं० १ । यथैका क्रिया द्व्यर्थकरी प्रसिद्धेतिन्यायेन स्वरसंकेताङ्कैर्बीजगणितमपि साध्यत इति बोध्यम् एवं गणितविद्याया रेखागणितं तृतीयोभागः सोप्यत्रोच्यते ॥

**इयं वेदिः परो अन्तः पृथिव्या अयं यज्ञो भुवनस्य नाभिः । अयꣳसोमो वृष्णो अश्वस्य रेतो ब्रह्मायं वाचः परमं व्योम ॥ ३ ॥ य० अ० २३ मं० ६२ ॥ कासीत्प्रमा प्रतिमा किं निदानमाज्यं किमासीत्परिधिः क आसीत् । छंदः किमासीत्प्रउगं किमु कथं यद्देवा देवमयजन्त विश्वे ॥ ४ ॥ ऋ० अ० ८ अ० ७ व० १८० मं० ३ ॥**

## भाष्यम् ॥

( इयं वेदिः० ) अभिप्रा० अत्र मंत्रयो रेखागणितं प्रकाश्यत इति । इयं या वेदिस्त्रिकोणा चतुरस्रा सेनाकारा वर्तुलाकारादियुक्ता क्रियतेऽस्या

वेदेराज्ञत्या रेखागणितोपदेशलक्षणं विज्ञायते। एवं पृथिव्याः परोऽन्तो यो भागोर्थात्सर्वतः सूत्रवेष्टनवदस्ति स परिधिरित्युच्यते। यश्चायं यज्ञोहि संगमनीयो रेखागणिते मध्यो व्यासाख्यो मध्यरेखाख्यश्च सोयं भुवनस्य भूगोलस्य ब्रह्मांडस्य वा नाभिरस्ति॥ ( अयꣳसो० ) सोमलोकोप्येवमेव परिध्यादि युक्तोस्ति ( वृष्णो अश्व० ) वृष्टिकर्त्तुः सूर्यस्याग्नेर्वायोर्वा वेगहेतोरपि परिध्यादिकं तथैवास्ति। रेतः ) तेषां वीर्यमौषधिरूपेण सामर्थ्यार्थं विस्तृतमप्यस्तीति वेद्यम् ॥ ( ब्रह्मायं वा० ) यद्ब्रह्मास्ति तद्वाण्याः ( परमंव्योम ) अर्थात्परिधिरूपेणान्तर्बहिःस्थितमस्ति ॥ ३ ॥ ( कासीत् प्रमा ) यथार्थज्ञानं यथार्थज्ञानवान् तत्साधिका (बुद्धिः कासीत् सर्वस्येति शेषः। एवम् ( प्रतिमा ) प्रतिमीयते ऽनया स प्रतिमायया परिमाणं क्रियते सा कासीत्। एवमेवास्य ( निदानम् ) कारण किमस्ति॥ ( आज्यम् ) ज्ञातव्यं घृतवत्सारभूतं चास्मिन् जगति ध्रुतमासीत् सर्वदुःखनिवारकमानन्देन स्निग्धं सारभूतं च ( परिधिः क ) तथास्य सर्वस्य विश्वस्य पृष्ठावरणं ( क आसीत् )। गोलस्य पदर्थस्योपरि सर्वतः सूत्रवेष्टनं कृत्वा यावती रेखा लभ्यते। स परिधिरित्युच्यते ( छन्दः० ) स्वच्छन्दं स्वतंत्रं वस्तु ( किमासीत् ) ( प्रउगं ) ग्रहोकथ स्तोतव्यं ( किमासीत् ) इति प्रश्नाः एषामुत्तराणि। (यद्देवा दे० यत् " देवं परमेश्वरं विश्वेदेवाः सर्वे विद्वांसः ( अयजन्त ) समपूजयन्त पूजयन्ति पूजयिष्यन्ति च स एव सर्वस्य ( मप्रा ) यथार्थतया ज्ञातास्ति ( प्रतिमा ) परिमाणकर्त्ता। एवमेवाग्रेपि पूर्वोक्तोर्थो योजनीयः अत्रापि परिधिशब्देन रेखागणितोपदेशलक्षणं विज्ञायते। सेयं विद्या ज्योतिषशास्त्रे विस्तरश उक्तास्ति। एवमेतद्विषयप्रतिपादका अपि वेदेषु बहवो मंत्राः सन्ति॥ इति संक्षेपतो गणितविद्याविषयः॥

SECTION II.

## ॥ अथ वैद्यकशास्त्रमूलोद्देशः संक्षेपतः ॥

सुमित्रियान आप ओषधयः सन्तु। दुर्मित्रिया-

स्तस्मै सन्तु योऽस्मान्द्वेष्टि यंच वयं द्विष्मः ॥ १ ॥ य०अ० ६ मं० २२ ॥

॥ भाष्यम् ॥

अस्याभिप्रायार्थः । इदं वैद्यकशास्त्रस्यायुर्वेदस्य मूलमस्ति । हे परमवैद्येश्वर भवत्कृपया ( नः ) ( अस्मभ्यं ) ओषधयः (सोमादयः) ( सुमित्रिया ) अत्र इया, ( ठियाजोकाराणामुपसंख्यानम् ) इति वार्त्तिकेन जसःस्थाने ( डियाच् ) इत्यादेशः सुमित्राः सुखप्रदारोगनाशकाः सन्तु यथावद्विज्ञाताश्च । तथैव (आपः) प्राणाः सुमित्राः सन्तु - तथा ( योस्मान्द्वेष्टि ) योऽधर्मात्मा कामक्रोधादिर्वा रोगश्च विरोधी भवति ( यंच वयं द्विष्मः ) यमधर्मात्मानं रोगं च वयं द्विष्मः ( तस्मै० ) दुर्मित्रिया दुर्मित्रियाः दुःखप्रदा विरोधिन्याः सन्तु । अर्थात् ये सुपथ्यकारिणस्तेभ्य ओषधयोमित्रवत् दुःखनाशिका भवन्ति । तथैव कुपथ्यकारिभ्यो मनुष्येभ्यश्च शत्रुवत् दुःखाय भवन्तीति । एवं वैद्यकशास्त्रस्य मूलार्थविधायकावेदेषु बहवो मन्त्राः सन्ति प्रसंगाभावान्नात्र लिख्यन्ते । यत्र यत्र ते मन्त्राः सन्ति तत्र तत्रैव तेषामर्थान्यथावदुदा हरिष्यामः ॥

## Chapter IX.

### Section I.

॥ अथ नौविमानादि विद्याविषयस्संक्षेपतः ।

तुग्रोह भुज्यमश्विनोदमेघेरयिं नकश्चिन्ममृवां अवाहाः । तमूहथुर्नौभिरात्मन्वतीभिरंतरिक्षप्रुद्भिरपोदकाभिः ॥ १ ॥ तिस्रः क्षपस्त्रिरहातिव्रजद्भिर्नासत्या भुज्युमूहथुः पतंगैः । समुद्रस्य धन्वन्नार्द्रस्य पारे त्रिभीरथैः शतपद्भिः षडश्वैः ॥ २ ॥ ऋ० । अ० १ । अ० ८ । व० ८ । मं० । ३ । ४ ॥

## ॥ भाष्यम् ॥

एषामभिप्रायः तुग्रेहेत्यादिषु मंत्रेषु शिल्पविद्या विधीयतइति (तुग्रोह०) तुजिहिंसाबलादाननिकेतनेषु । अस्माद्धातोरौणादिके रक प्रत्यये कृते तुग्र इति पदं जायते यः कश्चिद्धनाभिलाषो भवेत् ( रयिं ) सधनं कामयमानो ( भुज्युं ) पालनभोगमयं धनादिपदार्थभोगमिच्छन् विजयं च । पदार्थविद्यया स्वाभिलाषं प्राप्नुयात् । सच ( अश्विना० पृथिवीमयैः काष्ठलोष्ठादिभिः पदार्थैर्नावं रचयित्वा ऽग्निजलादिप्र योगेण ( उद्मेघे ) समुद्रे गमयेदागमयेच्च तेन द्रव्यादिसिद्धं साधयेत् एवं कुर्वन् न कश्चिन्मम्रवान् योगक्षेमविरहःसन् न मरणं कदाचित् प्राप्नोति कुतः तस्य कृतपुरुषार्थत्वात् । अतो नावं ( अवाहाः ) अर्थात् समुद्रे द्वीपांतरगमनंप्रति नावो वाहनावहने परमप्रयत्नेन नित्यं कुर्यात् कौ साधयित्वा (अश्विनाः) द्यौरिति द्योतनात्मकाग्निप्रयोगेण पृथिव्य पृथिवीमयेनायस्ताम्ररजतधातुकाष्ठादिमयेनचेयंक्रियासाधनीया । अश्विनौ युवां तौ साधितौ द्वौ नावादिकं यानं ( ऊहथुः ) देशांतरगमनं सम्यक् सुखेन प्रापयतः । पुरुषव्यत्ययेनात्र प्रथमपुरुषस्थाने मध्यमपुरुषप्रयोगः । कथंभूतैर्यानैः ( नौभिः ) समुद्रे गमनागमनहेतुरूपाभिः ( आत्मन्वतीभिः ) स्वयं स्थिताभिः स्वात्मीयस्थिताभिर्वा । राजपुरुषैर्व्य पारिभिश्च मनुष्यैर्व्यवहारार्थं समुद्रमार्गेण तासां गमनागमने नित्यं कार्ये इति शेषः । तथा ताभ्यामुक्तप्रकाराभ्यां भूयांस्यन्यान्यपि विमानादीनि । साधनीयानि एवमेव ( अंतरिक्षप्रुद्भिः ) अंतरिक्षं प्रतिगं त्वभि विमानाख्ययानैः साधितैः सर्वैर्मनुष्यैः परमैश्वर्य्य सम्यक् प्रापणीयम् पुनः कथंभूताभिर्नौभिः ( अपोदकाभिः ) अपगतं दूरीकृतं जललेपो यासांता अपोदकानावः । अर्थात् सच्छिद्रनास्ताभिः । उदरे जलागमन रहिताभिश्च समुद्रे गमनं कुर्य्यात्तथैव भूयानैर्भूमौ जलयानैर्जले अंतरिक्षयानैश्चांतरिक्षे चेति अर्थात्त्रिविधं यानं रचयित्वा जलभूम्याकाशग मनं यथावत्कुर्य्यादिति ॥ १ ॥ अत्र प्रमाणम् । अथातोद्युस्थानादेवता स्तासामश्विनौ प्रथमागामिनौभवतो ऽश्विनौ यद्व्यश्नुवाते सर्वं रसे

नान्योज्योतिषा ऽन्योऽश्वैरश्विनावित्यौर्णवाभस्तत्कावश्विनौ द्यावापृथि-व्यावित्येके ऽहोरात्रावित्येके सूर्य्याचन्द्रमसावित्येके ॥ निरु० अ० १२ खं० १ ॥ तथाश्विनौ चापि भर्त्तारौ जर्भरीभर्त्तारावित्यर्थस्तुर्फरीतूह-न्तारौ । उदन्यजेवेत्युदकजे इव रत्ने सामुद्रे ॥ निरु० अ० ०३ खं० ५ ॥ एतैः प्रमाणैरेतत्सिध्यति वायुजलाग्निपृथिवीविकारकलाकौशलसा-धनेन त्रिविधं यानं रचनीयमिति ॥ १ ॥ (तिस्रः क्षपस्त्रिरहा) कथं-भूतैर्नावादिभिः तिसृभीरात्रिभिस्त्रिभिर्दिनैः । (आर्द्रस्य) जलेन पू-र्णस्य समुद्रस्य तथा (धन्वनः) स्थलस्यान्तरिक्षस्य पारे (अतिव्रजद्भिः) अतत्यन्तवेगवद्भिः ॥ पुनः कथंभूतैः (पतङ्गैः) प्रतिपातं वेगेन गच्छद्भिः । तथा (त्रिभीरथैः) त्रिभी रमणीयसाधनैः (शतपद्भिः) शतेनासंख्या-तेन वेगेन मद्भ्यां यथा गच्छेत्ताटशैरत्यन्तवेगवद्भिः । (षडश्वैः) षडश्वा आशुगमनहेतवोयन्त्राण्यग्निस्थानानि वा येषु तानि षडश्वानि तैः ष-डश्वैर्यानैस्त्रिषु मार्गेषु सुखेन गन्तव्यमिति शेषः तेषां यानानां सिद्धिः केन द्रव्येण भवतीत्यत्राह ॥ (नासत्या) पूर्वोक्ताभ्यामश्विभ्याम् । अत एवोक्तं नासत्यौ द्यावापृथिव्यौ तानि यानानि (ऊहथुः) इत्यत्र पुरु-षव्यत्ययेन प्रथमस्य स्थाने मध्यमः प्रत्यक्षविषयवाचकत्वात् अत्र प्रमा-णम् । व्यत्ययोबहुलम् अष्टाध्याय्याम् । अ० ३ पा० १ अत्राह महाभा-ष्यकारः ॥ सुप्तिङुपग्रहलिंगनराणां कालहलच्स्वरकर्तृयङां च । व्यत्य-यमिच्छति शास्त्रकृदेषां सोपि च सिध्यति बाहुलकेनेति महाभाष्यप्र-माणात् ॥ तावेव नासत्यावाश्विनौ सम्यग् वहतइत्यत्र सामान्य-काले लिड्विधानात् । ऊहथुरित्युक्तम् । तावेव तेषां यानानां मुख्ये सा-धनेस्तः ॥ एवं कुर्वतो भुज्युमुत्तमसुखभोगं प्राप्नुयुर्नान्यथेति ॥ २ ॥

अनारम्भणे तदवीरयेथामनास्थाने अग्रभणे समुद्रे । यदश्विना ऊहथुर्भुज्युमस्तं शतारित्रां नावमातस्थिवां-सम् ॥ ३ ॥ यमश्विना ददथुः श्वेतमश्वमघाश्वाय शश्व-

दित्स्वस्ति तद्वां दात्रं महि कीर्त्तेन्यं भूत्पैद्वोवाजीसद्-मिद्व्यो अर्यः ॥ ४ ॥ ऋ० अष्ट० १ अ० ८ व० ८ । ६ । मं० ५ । १ । ॥ भाष्यम् ॥

हे मनुष्या पूर्वोक्ताभ्यां प्रयत्नाभ्यां कृतसिद्धयानैः ( अनारंभणे ) आलंबरहिते ( अनास्थाने ) स्थातुमशक्ये ( अग्रभणे ) हस्तालंबनः विद्यमाने ( समुद्रे ) समुद्रवन्व्यापो यस्मिन् यस्मिन् जलेन पूर्णे । अंतारिक्षे वा कार्य्यसिद्ध्यर्थं युष्माभिर्गंतव्यमिति ॥ अश्विना ऊहथुर्भुज्युमिति पूर्ववद्विज्ञेयम् । तद्यानं सम्यक् प्रयुक्ताभ्यां ताभ्यामश्विभ्यां (अस्तं) क्षिप्तं चालितं यानं सम्यक् कार्य्यं साधयतीति ॥ कथंभूतां नावं समुद्रे चालयेत् ( शतारित्राम् ) शतानि अरित्राणि लोहमयानि समुद्रस्थलांतरिक्षमध्ये स्तंभनार्थानि गाधग्रहणार्थानि च भवन्ति यस्यां तां शतारित्रां एवमेव शतारित्रं भूम्याकाशविमानं प्रतियोजनीयं तथा तदेतत्त्रिविध यानं शतकलं शतबंधनं शतस्तम्भनसाधनञ्च रचनीयमिति । तद्यानै-कथंभूतं भुज्युं भोगं प्राप्नुवन्ति ॥ ( तस्थिवासं ) स्थितिमंतमित्यर्थः ॥ ३ ॥ यद्यस्मादेवं भोगो जायते तस्मादेवं सर्वमनुष्यैः प्रयत्नः कर्त्तव्यः ( यमश्विना० ) यं सम्यक् प्रयुक्ताभ्यामग्निजलान्तामश्विभ्यां शुक्लवर्णं वाष्पाख्यमश्वं ( अधाश्वाय ) शीघ्रनाय शिल्पविद्याविधौ मनुष्याः प्राप्नुवन्ति तमेवाशं गृहीत्वा पूर्वोक्तानि यानानि साधयंति । ( शश्वत् ) सुखकारकाणि भवंति । तद्यानसिद्धि ( अश्विनाददथुः ) दत्तसाभ्यामेवायं गुणो मनुष्यैर्ग्राह्य इति ( वाम् ) अत्रापि पुरुषव्यत्यासः । तयोरश्विनोमध्ये यत्सामर्थ्यं वर्त्तते तत् कीदृशं ( दात्रं ) दानयोग्यंसु खकारकत्वात्पोषकं च ( महि१ ) महागुणयुक्तम् ( कीर्त्तन्यम् ) कीर्त्तनीयमत्यंतप्रशंसकृत्यार्थेतवैकेनकेन्यत्वन इति केन्य प्रत्ययः अन्येभ्यस्तच्छ्रेष्ठोपकारकं । ( भूत् ) अभूत् भवतीति अत्र लडर्थे लुङ्विहित इति वेद्यम् ॥ स चाश्वाख्यो वाजी वेगवान् ( पैद्वः० ) यो यानं मार्गे शीघ्रवेगेन गम

यितास्ति पैद्वएतंगावश्वनाम्नो। नियं० अ० १ खं० १४। ( सदमित् ) यः सदं वेगं इत् एति प्राप्नोतीतीदृशोऽश्वो ऽग्निरस्माभिः ( हव्यः ) ग्राह्योस्ति। ( अर्य्यः ) तमश्वमर्य्यो वैश्यो वणिग्जनोऽवश्यं गृह्णीयात्॥ अर्य्यः स्वामिवैश्ययो। इति पाणिनिसूत्रात्। अर्य्यो वैश्य स्वामिवाचीति ॥ ४ ॥

त्रयः पवयो मधुवाहने रथे सोमस्य वेनामनु विश्व इद्विदुः। त्रयः स्कम्भासः स्कभितास आरभे त्रिर्नक्तं याथस्त्रिर्वश्विना दिवा॥ ५॥ ऋ० अष्ट १ अ० ३ वर्ग ४ मं० । १॥ ॥ भाष्यम् ॥

( मधुवाहने ) मधुरगतिमतिरथे ( त्रयः पवयः ) वज्रतुल्याश्चसक्रसमूहाः कलायंत्रयुक्ता दृढाः शीघ्रं गमनार्थं त्रयः कार्य्याः। तथैव शिल्पिभिः ( त्रयः स्कभासः ) स्तंभनार्थाः स्तम्भास्त्रयः कार्य्याः ( स्कभितासः० ) किमर्थाः सर्वकलानां स्थापनार्थाः ( विश्वे सर्वे शिल्पिनो विद्वांसः। ( सोमस्य ) सोमगुणविशिष्टस्य सुखस्य ( वेनां ) कमनीयां कामनासिद्धिं विदुर्जानंत्येव॥ अर्थात् ( अश्विना ) अश्विभ्यामेवैतद्यानमारब्धुमिच्छेयुः। कुतः तावेवाश्विनौ तद्यानसिद्धिं ( याथः ) प्रापयत इति। तत्कीदृशमित्यत्राह ( त्रिर्नक्तम् ) ( त्रिर्दिवा ) तिसृभिरात्रिभिस्त्रिभिर्दिनैश्चातिदूरमपि मार्गं गमयतीति बोध्यम्॥ ५॥

त्रिर्नो अश्विना यजता दिवेदिवे परित्रिधातु पृथिवी मशायतम्। तिस्रो नासत्या रथ्या परावत आत्मेव वातः स्वसराणि गच्छतम् ॥ ६ ॥ ऋ० अष्ट० १ अ० ३ व० ५ मं० ॥ ७॥ अरित्रं वांदिवस्पृथु तीर्थे

सिंधूनां रथः। धियोयुयुज्र इन्दवः ॥ ७ ॥ ऋ० अष्ट० १ अ० ३ व० ३४ मं० ८ ॥ वियेभ्रजंते सुमखास ऋष्टिभिः प्रच्यावयंतो अच्युता चिदोजसा। मनो जुवो यन्मरुतो रथेष्वा वृष व्रतासः पृषती रयुग्ध्वम् ॥ ८ ॥ ऋ० अ० १ अ० ६ व० ६ मं० ४ ॥ भाष्यम् ॥

यत्पूर्वोक्तं भूमिसमुद्रांतरिक्षेषु गमनार्थं यानमुक्तं तत् पुनः कीदृशं कर्त्तव्यमित्यत्राह ॥ ( परिज्मिधातु ) अयस्ताम्ररजतादि धातुत्रयेण रचनीयम्। इदं कीदृग्वेगं भवतीत्यत्राह। ( आत्मेव वातः० ) आगमनागमने। तथात्मा मनश्च शीघ्रं गच्छत्यागच्छति तथैव कला प्रेरितौ वायुग्नी अश्विनौ तद्यानं त्वरितं गमयत आगमयतश्चेति विज्ञेयमिति संक्षेपतः ॥ ६ ॥ तच्च कीदृशं यानमित्यत्राह ( अरित्र ) स्तम्भनार्थसाधनयुक्तं ( पृथु ) अतिविस्तीर्णं। ईदृशश्चः स रथः अग्न्यश्वयुक्तः ( सिंधूनाम ) महासमुद्राणां ( तीर्थे ) तरणे कर्तव्ये ऽलं वेगवान् भवतीति बोध्यम् ( धियायु० ) तत्र त्रिविधेथे ( इंदवः ) जलानि बाष्पवेगार्थं ( युयुज्रे ) यथावद्युक्तानि कार्य्याणि। येनातीव शीघ्रगामी स रथः स्यादिति ( इन्दवः ) इति जलनामसु निघण्टौ खण्डे १२ पठितम् ( उन्दे रिच्चादेः )। उणादौ प्रथमे पादे सूत्रम् ॥ ७ ॥ हे मनुष्याः ( मनोजुवः ) मनोवद्गतयो वायवो यंत्रकलाचालनैस्तेषु रथेषु पूर्वोक्तेषु त्रिविध्यानेषु यूयम् ( अयुग्ध्वम् ) तान् यथावद्यो जयत। कथंभूता अग्निवाय्वादयः। ( आवृष व्रातासः ) जलसेचनयुक्ताः येषां संयोगे वाष्पजन्यवेगोत्पत्त्या वेगवन्ति तानि यानानि सिद्धं तीत्युपदिश्यते ॥८॥

आनो नावमतीनां यातं पाराय गंतवे युञ्जाथामश्विना रथम् ॥ ६ ॥ ऋ० अष्ट० १ अ० ३ व० ३४

मं० ७ ॥ कृष्णं नियानं हरयः सुपर्णा अपो वसाना दि-
वमुत्पतन्ति । तआववृत्रन्त्सदना दृतस्यादिद् घृतेन पृ-
थिवी व्युद्यते ॥ १० ॥ द्वादशप्रधयश्चक्रमेकं त्रीणि नभ्यानि
कउतच्चिकेत । तस्मिन्त्साकं त्रिशता नशंकवोऽर्पिताः
षष्टिर्नचलाचलासः ॥ ११ ॥ ऋ० अष्ट० २ अ० ३ व०
२३ । २४ । मं ४७ । ४८ ॥

## ॥ भाष्यम् ॥

समुद्रे भूमौ अन्तरिक्षे गमनयोग्यमार्गस्य ( पाराय ) ( गंतवे ) गंतुं यानानि रचनीयानि ( नावामतीनाम् ) यथा समुद्रगमनवृत्तीनां मेधाविनां नावा नौकया पारं गच्छन्ति तथैव ( नः ) अस्माकमपि नौरुत्तमा भवेत् ( आयुञ्जाथाम० ) यथा मेधाविभिरग्निजले आसमंताद्यानेषु युज्येते । तथास्माभिरपि योजनीये भवतः । एवं सर्वैर्मनुष्यैः समुद्रादीनां पारावारगमनाय पूर्वोक्त यानरचने प्रयत्नः कर्त्तव्य इत्यर्थः मेधाविनामसु निघण्टौ १५ खण्डे मतय इति पठितम् ॥ ८ ॥ हे मनुष्याः ( सुपर्णाः ) शोभनपतनशीलाः ( हरयः ) अग्न्यादयोऽश्वाः । ( अपोवसानाः ) जलपात्राच्छादिता अधस्ताज्ज्वालारूपाः काष्ठेन्धनैः प्रज्वालिताः कलाकौशल भ्रामणयुक्ताः कृताश्चेत्तदा ( कृष्णं ) पृथिवीविकारमयं ( नियानं ) निश्चितं यानं ( दिवमुत्प ) द्योतनात्मकमाकाशमुत्पतन्ति । ऊर्द्धं गमयंतीत्यर्थः ॥ १० ॥ ( द्वादशप्रधयः ) तेषु यानेषु प्रधयः सर्वकलायुक्तानामराणां धारणार्थाद्वादशकर्त्तव्याः ॥ ( चक्रमेकम् ) तन्मध्ये सर्वकलाभ्रामणार्थमेकं चक्रं रचनीयम् ( त्रीणि नभ्यानि ) मध्यस्थानि मध्यावयवधारणार्थानि त्रीणियन्त्राणि रचनीयानि तैः ( साकं त्रिशता ) त्रीणि शतानि ( शंकवोऽर्पिताः ) यन्त्रकलारचयित्वा

स्थापनीया: ( चलाचलास: ) ता: कला: चला: चालनार्हा: । अचला: स्थित्यर्हा: ( षष्टि: ) षष्टिसंख्याकानि कलायंत्राणि स्थापनीयानि । तस्मिन्याने । एतदादिविधानं सर्वं कर्तव्यम् । (कउतच्चिकेत) इत्येतत्कृत्यं को विजानाति ( न ) नहि सर्वं । इत्यादय एतद्विषया वेदेषु बह्वीमंत्रास्सन्त्य प्रसंगादत्र सर्वे नोल्लिख्यन्ते ॥ ११ ॥

## ॥ अथ तारविद्यामूलं संक्षेपत: ॥

SECTION II.

युवं पेदवे पुरुवारमश्विना स्पृधां श्वेतं तरुतारं दुवस्यथ: । शर्यैरभिद्युं पृतनासुदुष्टरं चर्कृत्यमिन्द्रमिव चर्षणीसहम् ॥८॥ ऋ० अष्ट० १ अ० ८ व० २१ मं० १० ॥

## ॥ भाष्यम् ॥

( अस्माभि० ) अस्मिन् मंत्रे तारविद्याबीजं प्रकाश्यत इति हे मनुष्या ( अश्विना० ) अश्विनोर्गुणयुक्तं ( पुरुवारं ) बहुभिर्विद्वद्भि: कर्त्तव्यम् बहूत्तमगुणयुक्तम् ॥ ( श्वेतं ) अग्निगुणविद्युन्मयं शुद्धधातुनिर्मितम् । अभिद्युं प्राप्त विद्युत्प्रकाशम् । ( पृतनासुदुष्टरं ) राजसेनाकार्य्येषु दुस्तरं प्लवितुमशक्यं ( चर्कृत्यं ) सर्वक्रियासु योजनीयम् । ( तरुतारं० ) ताराख्यं यंत्रं यूयं कुरुत । कथंभूतैर्गुणैर्युक्तं ( शर्यै: पुन: पुनर्हननप्रेरणगुणैर्युक्तम् । कस्मै प्रयोजनाय ( पेदवे परमोत्तमव्यवहारसिद्धिप्रापणाय । पुन: कथंभूतं ( स्पृधा ) स्पर्द्धमानानां शत्रूणां पराजयाय स्वकीयानां वीराणां विजयाय च परमोत्तमम् । पुन: कथंभूतं ( चर्षणीसहम्० ) मनुष्यसेनाया: कार्यसहनशीलम् पुन: कथंभूतं ( इन्द्रमिव० ) सूर्यवत् दूरस्थमपि व्यवहारप्रकाशनसमर्थं ( युवं ) युवामश्विनौ ( दुवस्यथ: ) पुरुषवत्र्यत्ययेन पृथिवीविद्युदाख्यावश्विनौ सम्यक् साधयित्वा तत्ताराख्यं यंत्रं नित्यंसेवध्वमिति बोध्यम् ॥ ८ ॥

Printed at the Mufid i-Am Press, Lahore.

गुरु विरजानन्द दण्डी
सन्दर्भ पुस्तकालय
पु परिग्रहण क्रमांक ... १९९ ...
दयानन्द महिला मह... त्र